वानप्रस्था[दन्यः प्रव्रजि][1]तभावः । श्रमणसौगतादिः [।] **सजातादन्यः संघो** बहूनामेकीभावः सहोत्पन्नानामेव तस्मादन्यः संघः श्रेणीबंधः । **सामुत्थायिकादन्यः समयानुबंधः** । सम्यगुत्थानं धर्म्मार्थ[मिति स][2]मुत्थायस्तेन चरतीति । सेतुबंधतडागाद्यर्थः समयानुबंधस्तस्मादन्यः चौर्यादिसमयानुबंधो **नास्य जनपदमुपनिवेशेत** । अयं निवेशविषयो नियमः । आगतवस्तु.........[पा][3]षंडादयो राज्ञानुज्ञाताः प्रविशंत्यन्यथोदास्थितपरिव्राजकाश्रमादिपाषंडानामुपादानं व्यर्थं स्यात् । श्रेण्याः सेनांगत्वं च हीयते ।

कोशवृद्ध्यर्थमाह ।*

न च तत्रा[रामा][4] विहारार्था वाँ शालाः स्युः । नटनर्तकगायनवादकवाग्जीवनकुशीलवा वा न कर्म्मविघ्नं कुर्युरिति ॥ [२.१.३०]

न च अ(त?)त्र निवेशे **आरामाः** विलासैरारमंते कर्षका इति । छायामात्रो[5]पयोगिनस्तु स्युः । **विहारार्था वा शाला** द्यूतादिक्रीडार्थाः शाला न **स्युः** । कर्षणे विहरणात् कर्म्मविघ्ने कोशावृद्धिरिति भावः । **नटादयः** प्रतीतास्ते च कृषि**कर्म्मविघ्नं** प्रेक्ष[णा][6]दिभिर्न कुर्युरिति ।

---

१ SJG व्यवायः । २ Jv.l. S प्रव्रजेदावृश्च्य धर्मस्थान् । Sv.l. प्रव्रजेदापृच्छ्य धर्मस्थान् । ३ G सु° । ४ Jv.l. GS य°, TSv.l. यि°. ५ SJ °राम विहारार्थाः । G °रामा विहारार्थाः । Sv.l. °रामा । ६ SJG वा dropped । ७ SJG °न ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र हेतुः ।*

निराश्रयत्वाद्ग्रामाणां क्षेत्राभिरामत्वाच्च पुरुषाणां कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवतीति ॥ [२.१.३१]

निराश्रयत्वाद्ग्रामाणां शालारामाभावात्[7] **क्षेत्राभिगमत्वाच्च पुरुषाणां** नटाद्यभावात् । **कोशादिवृद्धिर्भवति । कोशोहि** हिरण्यदानात् । **विष्टिः** सीतादिसाहाय्यदानात् । **द्रव्यं** वस्त्रादि । **ध{ा}न्यानां रसानां** तैलघृता[8][5B]दीनां **वृद्धिर्भवति ।** तद्वृद्ध्या राज्यवृद्धिः ।

उत्तरत्रापि परिहारमाह ।*

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम् ।
देशं परिहरेद्राजा व्ययक्रीडाश्च वर्जयेदिति[2] **॥ [२.१.३२]**

परचक्रं शत्रु[सै][1]न्यं । अटव्याटविकस्ताभ्यां **ग्रस्तं** कृतदाहविलोपं **व्याधिदुर्भिक्षपीडितं देशं परिहरेत्** दण्डकरादि न गृह्णीयादित्यर्थः । **व्ययक्रीडाश्च** कर्षकादीनां परस्परस्पर्द्धया......[व्य][2]यक्रीडा निषेधयेत् । विघ्नं मा भूदिति ।

वार्त्तारक्षार्थमाह ।*

दण्डविष्टिकराबाधै रक्षेदुपहतां कृषिम् ।
स्तेनव्यालविषग्राहैर्व्याधिभिश्च पशुव्रजान् ॥ [२.१.३३]

दण्डविष्टिकरैः......[3]चितादभ्यधिकगृहीतैः समाहर्त्तादिभिर्ये **आबाधास्तैरुपहतां** पीडितां **कृषिं** रक्षेदिति सम्बन्धः । **स्तेनैश्चौरैर्व्यालैर्व्याघ्रादिभिर्विषैः** स्थावरजङ्गमैर्**ग्राहैः** शिशुमारादि[4]भिर्**व्याधिभिरी**शानज्वरादिभिरुपहतान् **पशुव्रजान्** रक्षेत् ॥ छ ॥

वल्लभैः कार्म्मिकैः स्तेनैरन्तपालैश्च पीडितम् ।
शोधयेत् पशुसङ्घैश्च क्षीयमाणं वणिक्पथ[मिति] ॥[5] **[२.१.४३]**

वल्लभै राज्ञीकुमारादिभिः । **कार्म्मिकैः** शुल्काध्यक्षादिभिः । **स्तेनैरन्तपा**[6][6A][1]**लैश्च पीडितं** रक्षेदिति वर्त्तते । **पशुसङ्घैश्च क्षीयमाणं वणिक्पथं शोधयेदिति ।** राजा स्वपशुदानैरनुगृह्णीयादिति भावार्थः ।

अतिदेशमाह ।*

एवं द्रव्य[द्विपवनं[3] **सेतुबन्ध]**[1]**मथाकरान् ।**
रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेदिति ॥ [२.१.४४]

एवमनंतरोक्तविधानेन वल्लभादिभिः पीड्यमानं **द्रव्यवनं {द्विपवनं}** हस्तिवनं **सेतुबन्धमथाकरान्......**[2] **पूर्वकृतान् राजा नवांश्चाभिप्रवर्त्तयेत्** ॥ छ ॥

*

इति मुग्धविलासाङ्कयोग्घमविरचितनीतिनिर्णीत्यभिधानायां कौटलीयराजसिद्धान्तटीकायामध्यक्षप्रचारे प्रथ[मो अ][3]**ध्यायः ॥ छ ॥ छ ॥**

---

१ SJG °रतत्वाच । २ SJG वारयत् । ३ S द्रव्यं द्विप°, J द्रव्यद्विप° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[भूमिच्छिद्रापिधाननामा द्वितीयोऽध्यायः ।]

भूमिच्छिद्रापिधानमि[1]ति सूत्रम् ॥ [२.२.१]

भूमेश्छिद्रमिव च्छिद्रमकृष्यत्वं धान्याद्यभावात् । **अपिधान**मावरणमपिधानमिवापिधानम् । धर्म्मार्थकामाख्यफलस्वभा[4]वात् । **अपि**पूर्वो दधातिरावरणे वर्त्तत इति सूत्रार्थः । सम्बन्धस्तु जनपदनिवेशशेषमेवैतत् । कृष्यायां भूमौ निवेश उक्तः । अकृष्यायामुच्यत[5] इति ॥ छ ॥

अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेदिति ॥ [२.२.२]

पाषा[3][6B]णादिभिरकृषियोग्यायां **भूमौ पशुभ्यो** गोमहिष्यादिभ्यो **विवीतानि** तृणारण्यानि **प्रयच्छेत्** । वी प्रगतिप्रजनकान्त्यसनखादनेषु पठितोऽत्र खादने द्रष्टव्यः ॥ छ ॥

प्रदि[1]ष्टाभयस्थावरजंगमानि च[2] ब्रह्मसोमारण्यानि[3] तपस्विभ्यो गोरुतपराणि[4] प्रयच्छेदिति ॥ [२.२.३]

प्रदिष्टं दत्तम**भयं** छेदवधनिषेधात् **स्थावराणां** वृक्षादीनां **जंगमानां** पक्षिमृगा[2]दीनां येषु तानि, **तपस्विभ्यो** वानप्रस्थस्नातकादिभ्यो **ब्रह्मसोमारण्यानि** ब्रह्मारण्यं यत्रारण्यकादिवेदोपनिषदधीयते । सोमारण्यं यज्ञभूमिस्तानि । **गोरुतपराणि**[3] क्रोशपराणि । क्रोशः परं प्रमाणमिति । अधिकं प्रमाणं नेष्यते चौराद्याश्रयदोषात् ।

धर्म्मापिधानमुक्त्वा कामापिधानमाह ।*

तावन्मात्रमेकद्वारं खातगुप्तं स्वादुफ[5]ललतागुल्मगुच्छमकंटकिद्रुमम् उत्तानतोयाशयं दान्तमृगचतुष्पादं[6] भग्ननखदंष्ट्रव्यालं[7] मार्गयुकहस्तिहस्तिनीकलभं[8] मृगवनं विहारार्थं राज्ञः कारयेत् ॥ [२.२.४]

[तावन्मा][5]त्रं गोरुतपरमेव च । **एकद्वारं** रक्षासौकर्यार्थम् । **खातगुप्तं** द्वारखातयोरुपादानात् प्राकारोपपन्नम् । **स्वादुफला गुल्माः** करमर्दकादयः । **गुच्छा** बदरामलकाद्य[6]स्ताः शाखिनो यस्मिन् । **अकंटकिनो द्रुमा** यस्मिन् । **उत्ताना** अगाधेतरा**स्तोयाशया** यस्मिन् । **दांता** विनयं ग्राहिता **मृगा** एणादय**श्चतुष्पदा** महिषगवयादयो……[7]योगार्थम् । **भग्ना नखा दंष्ट्राश्च** वालत्र एव येषां **व्यालानां** व्याघ्रादीनां ते यत्र । **मार्ग्गयुक**मिति । मृगयु[8]र्व्याधस्तस्य कर्म्म मार्गयुकं हस्तिशिक्षोक्तं येषां **हस्तिहस्तिनीकल**[9][7A]**भानां** यस्मिन् । ते हि शिक्षावशात् मृगं विधृत्य हत्वा वा राज्ञोऽर्प्पयंतीति **मृगयावनं विहारार्थं राज्ञः कारयेत्** ॥ छ ॥

सर्वातिथिमृगं प्रत्यंते चान्यत् मृगवनं भूमिवशेन वा[निवेश][1]येत् ॥ [२.२.५]

---

१ SJG भूमिच्छिद्रविधानम् । २ SJG read ब्राह्मणेभ्यो after च । ३ SJG तपोवनानि च after ब्रह्म° । ४ S,Jvl. गोत्र (त)°; Svl., Jvl. गोरूत°; J गोत्रक° । ५ SJG लता° dropped । ६ SJG °ष्पदं । ७ SJ व्याऽङमा° । ८ SJG मार्ग° । ९ S° कलभमृग° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वेऽतिथिवत् पूज्यंते दत्ताभयाः पोष्यंते धर्म्मार्थं यत्र **प्रत्यंते** तस्मिन् **निवेशयेत् । अन्यद् वा** वनं रक्षया निवेशयेदिति संबंधः । **च**शव्दादन्यदपि **मृगवनं** निवे-[शयेत्](2) मृगयारण्ये निक्षेपार्थं **भूमिवशेन वा** अप्रत्यंतेऽपि यत्र मृगाः संतीति ।

अर्थापिधानमभिधातुमाह ।*

कुप्यप्रदिष्टानां च द्रव्याणां तरूणां[1] **मेकैकशो वनानि निवेशये**(3)**त् । द्रव्यवनकर्म्मांतानटवीश्च द्रव्यवनापाश्रया इति** ॥ [२.२.६]

कुप्याध्यायप्रदिष्टानां द्रव्याणामिति । **तरूणां** शाकतिनिशादीनां प्रत्येकश एकजातीयानां पृथक्पृथग् **वनानि नि**(4)**वेशयेत् । द्रव्यवनकर्म्म(र्म्मां)तां**श्च वृक्षच्छेदनतक्षणादिस्थानानि निवेशयेत् । **अटवी**श्चाटविकांश्च **द्रव्यवनापाश्रया** रक्षणार्थं निवेशयेदिति संबंधः ।

हस्तिवननिवेशमाह ।*(5)

प्रत्यंते हस्तिवनमटव्यारक्षं[3] **निवेशयेदिति** ॥ [२.२.७]

प्रत्यंते जनपदमध्ये पीडावहत्वात् । **हस्तिवनं** निवेशयेदिति संबंधः । **अटव्यारक्षमाट**विकारक्षम् ॥ छ ॥

नागवनाध्यक्षः(6) **पार्वतं नादेयं सारसमानूपं च नागवनं विदितपर्यन्तप्रवेशनिष्कासं**[4] **नागवनपालैः पालयेदिति** ॥ [२.२.८]

चतुर्विधं वनं पालयेदिति संबंधः । पर्वते भवं **पार्वतं** तस्य लक्षणं क(7)टुतिक्तकषायाम्लवृक्षौषधिरसद्रवः । पार्वतस्तृणपाषाणविषमो देश उच्यते । नद्यां भवं **नादेयम् ।** तथा च उक्तम् ।(8)

> **नलवंजुलविष्यंदिवालुकास्थलसंयुतः ।**
> **सर्वसाधारणद्रव्यो नादे**(9)[7B]**यो देश उच्यते ॥**

सरसि भवं **सारसम् ।** उक्तं च ।

> **उत्तृणः स्थलसंरोधी स्निग्धमूलवनौषधिः ।**
> **विदाही जलविष्यंदी सारसः संप्रकीर्त्तितः ॥**

तथा ।

> **सुस्वादुमधुरस्निग्ध-कषा**(1)**यौषधिवीरुधः ।**
> **बहुपंकोदकक्षारः सोऽनूपो देश उच्यते ॥**

तत्र भव**मानूपम् ।** एवं चतुर्विधमपि वनं **नागवनपालैः** कृत्वा **नागवनाध्यक्षः पालयेत्** [।] हस्तिनां वनं सर्वोप......(2)वनिषेधात् । विदितपर्यन्तप्रवेशनिष्कासमिति संबंधः ॥ छ ॥

---

१ SJG तरूणां dropped. २ SJG वा वनं । † SJ read this sutra with the following one. ३ J रक्ष्यं; Jvl. रक्षन् । ४ SJG निष्कसनं; Svl. निष्कास ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हस्तिघातिनं हन्युर्दंतयुगं स्वयंमृतं[1]स्याहरतः सपादचतुष्पणो लाभः ॥ [२.२.९]

हस्तिघातिनं हन्युर्नागवनपा[3]लाः । **दंतयुगं स्वयंमृतस्य** हस्तिनो नागवनपालस्यान्यस्य वाऽऽ**हरतः सपादचतुष्पणो लाभः** । पादस्याधिकत्वं तात्कालिकभोजनार्थमन्यथा पंचादिष्वपि संपूर्णेषु पणेषु दत्ते......[4] भोजनाय पणभंगमस्थिभंगमिव मन्यमाना[5] नातिप्रहृष्यंतीति भावः ॥

ग्रहणार्थं हस्तिकुलाग्रज्ञानायाह ।*

नागवनपाला हस्तिपकपादपाशिकसैमिक[2]वनचरकपारि[5]कर्म्मिकसखा हस्तिमूत्रपुरीषच्छन्नात्मगंधा[3] भल्लातकीशाखापत्रप्रच्छन्ना[4]ः पंचभिः सप्तभिर्वा हस्तिबंधकीभिः सह चरंतः शय्यास्थानपद्यालेंड[5]नदीकूलघातोद्देशेन हस्तिकु[6]लपर्यग्रं विद्युरिति ॥ [२.२.१०]

नागवनपालाः, हस्तिपक आरोहकः, पादपाशनियुक्तः, **सैमिको** वनमर्यादाभिज्ञः । **वनचरकः** शबरादिः, **पारकर्मिकः** शिक्षोक्तपरिकर्म्मकुशल[7]स्तेषां सहाया भूत्वा, **हस्तिमूत्रपुरीषच्छन्नगंधा**स्तद्रसभावितकंचुकिभिः । **भल्लातकी** आरुष्करवृक्षः तस्य पत्रोपलक्षितशाखाच्छन्नरूपाः । हस्तिनो हि भल्लातकी......[8] हरंतीति । **पंचभिः सप्तभि**रिति विषमसंख्याग्रहणं हस्तिप्रलोभनार्थम् ।

उक्तं च ।

> **संयोगकामो नैराश्यं युग्मासु प्रतिपद्यते ।**
> **अयुग्माश्चारयेत्तस्मात्पूरणा सं.........[॥][9]**

हस्तिबंधक्यो गणिकाबंधक्य इव । हस्तिप्रलोभनात् । ताभिरिति तदारूढः **सहचरंतः** कुल......[10][8A] ....निक्षेपचिह्नाकारतः, लिं(लें?)डं पुरीषाकारतः, **कूलघातो** दंतोत्खाताकारतः, **तदुद्देशे**.........[1]रिग्रहार्थं **पर्यग्रं** समस्तप्रमाणं **विद्यु**र्ग्रहणार्थम् ॥ छ ॥

यूथचरमेकचरं निर्यूथं यूथपतिं हस्तिनं [व्यालं मत्तं पोतं बन्ध[6]मुक्तं च निबन्धेन] विद्युः ॥ [२.२.११]

यूथे चरतीति **यूथचर** ....[2] **एकचर**मिति, स्वयमेव यूथान्निःसृतं **निर्यूथं** यूथान्निर्द्धारि(टि?)तं **यूथपतिं हस्तिनं** तेष्वपि **व्यालं** दुष्टं **मत्तं** हस्तिनमिति सर्वत्र योज्यम् । **पोतं** बालं **बंधमुक्तं** केनाप्य.........[3]यं वा **निबंधेन** लेख्यपुस्तकारोपणेन **विद्युः** ॥छ॥

---

१ S मृग° । २ S सौमि° । ३ SJG °च्छन्नगन्धा । ४ SJG शाखाप्रतिच्छन्नाः, Jvl. प्रतिच्छन्नान् । ५ SJG °लण्डकूलपा-[Svl. कुलपो-] तोद्देशेन । ६ SG बद्ध°, Svl., Gvl. –बन्धमु°; Gvl. बद्धं मु° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिनो गृह्णीयुः ॥ [२.२.१२]

अनीकस्था हस्तिशिक्षाविदस्तेषां येऽतिकुशलत्वात्.........[4]माणभूतास्तैः प्रकर्षेण शस्तानि व्यज्यते शुभत्वादिर्यैस्तानि **व्यंजनानि** लक्षणानि, आचाराश्चरितानि **प्रशस्तानि**येषां तान् **हस्तिनो** [गृह्णी][5] **युः** । ग्रहणोपायाश्च पञ्चतन्त्रान्तरोक्तास्तद्यथा ।

वशाकल्पावपातौ च वारिकर्म्मानुगम्य यत् ।
आपाने च पतत्येतदनुसृत्य च वंधनम् ॥ इति ॥

कथमेतेषां महाप्रयत्नेन प्र[6]हणमित्याह ।*

हस्तिप्रधानो विजयो राज्ञ इति ॥ [२.२.१३]

विजये हस्तिन एव प्रधानं तदायत्तत्वात् विजयस्य । यस्मात्तदेव दर्शयतीति ।*

परानीकव्यूहदुर्गस्कन्धावारप्रम[7]र्दना ह्यतिप्रमाणशरीराः प्राणहरकर्म्मणो[2] हस्तिन इति ॥ [२.२.१४]

अनीकं सैन्यं **व्यूहं** दंडभोगादि । **दुर्गं** वप्रप्राकाराद्युपलक्षितम् । **स्कंधावारः** शिबिरसन्निवेशः । परेषामनीक[8]व्यूहस्कंधावारप्रमर्दनाः । यतस्तेऽन्यचतुष्पदेभ्योऽति**प्रमाणशरीरास्तया प्राणहरकर्म्माणः** 'स्पृशन्नपि गजो हंती'ति । तस्मात् संग्राह्या **हस्तिन इति** ।

वनाश्रयां श्रेष्ठतामा[9]ह ।*

[3]कालिंगांगर(ग)जाः श्रेष्ठाः प्राच्याश्चेदि[4]करूषजाः ।
दशार्णाश्चापरांताश्च गजानां[5] मध्यमा मताः ॥
सौराष्ट्र[6]काः पांचनद[7]ास्तेषां प्रत्यवराः स्मृताः ॥ इति ॥ [२.२.१५]

उत्कलानां च देशस्य[10] [8B] दक्षिणस्यार्णवस्य च ।
सह्यस्य च कलिंगस्य मध्ये कालिंगकं वनम् ॥

तथा ।

वैदेशं नर्म्मदा चैव ब्रह्मवर्द्धनमित्यपि ।
मध्ये च पारियात्राणां वनं स्यादांगरेयकम् ॥

इति वनद्वयजाः श्रेष्ठाः ।[1]

लोहित्यस्य प्रयागस्य गंगाहिमवतोरपि ।
मध्ये प्राच्यं वनं तत्र संभवंति दिशां गजाः ॥

तथा ।

मेकला त्रिपुरी चैव दशार्णो देश इत्यपि ।
उन्मत्तगंगामित्येषां मध्ये चेदिकरू[2]षकम् ॥

---

१ SJG राज्ञाम् । २ SJG कर्मांणो । ३ SJG कालिंगा । ४ SJ श्चेति° । ५ SJG द्विपानां । ६ SJG सौराष्ट्रिकाः । ७ SJ, Gvl. पांचजनाः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथा ।

देशस्य च दशार्णानां ख्यातस्य च महागिरेः ।
विंध्याद्रेर्वेत्रवत्याश्च मध्ये दाशार्णकं वनम् ॥

तथा ।

अवंतीनां च देशस्य नर्म्मदायास्तथैव च ।
द्वारकार्बुदयोश्चैव मध्ये सौ(3)राष्ट्रकं वनम् ॥
कुरुक्षेत्रस्य देशस्य कालिकाकाननस्य च ।
सिंधोर्हिमवतश्चैव मध्ये पांचनदं वनम् ॥

कालिंगकांगरेयकवनभवाः श्रेष्ठाः । प्राच्यचेदिकरूषवनदाशार्णापरां(4)तकभवा मध्यमाः । सौराष्ट्राः पांचनदभवा अवराः ।

अस्यापवादः ।*

सर्वेषां कर्म्मणा वीर्यं[1] जवस्तेजश्च वर्द्धत इति ॥ [२.२.१६]

अवराणामपि कर्म्मणा स्थितभौमोत्तरा...यादिना.........(5) बलं उत्साहलिंगं जवो वेगस्तेजः शौर्यं च वर्द्धते ॥

इति मुग्धविलासां(6) [9A] कयोग्घमविरचितनीतिनिर्णीत्यभिधानायां कौटलीय-राजसिद्धान्तटीकायामध्यक्षप्रचारे द्वितीयोऽध्यायः ॥ छ ॥ छ ॥

[दुर्गविधाननामा तृतीयोऽध्यायः ।]

दुर्गविधानमिति सूत्रम् ॥ [२.३.१]

दुःखेन गम्यते परैरिति **दुर्गस्त**(1)**स्य विधानं** वप्रादिरचनयेति सूत्रार्थः । संबंधस्तु स्वाम्यमात्यजनपदानां लाभः पालनं चाभिहितम्, दुर्गप्रकृतेरभिधीयत इति महासंबंधः । अनंतरसंबंधश्च जनपदनिवे.........(2)न्तपालदुर्गाण्युद्दिष्टानि । स्थानीयं च यत्र निशांतमभिहितं तेषां विधानमिति ।

जनपदरक्षार्थं तावत् स्थानीयादिदुर्गविधानमाह ।*

चतुर्दिशं जनपदांते सांपरायि(3)कं दैवकृतं[2] दुर्गं कारयेदिति ॥ [२.३.२]

चतुर्दिक्षु **जनपदांते सांपरायिक**मिति । परेषां शत्रूणां आय आगमनं परायः, सम्यक् सर्वसामग्र्या परायस्तस्मै प्रतिस्खलनाय प्रभवती(4)ति सांपरायिकम् । अथवा सम्यक् परेषामायः कोशसंपत् तद्विनाशाय प्रभवतीति सांपरायिकम् । स्वजनपदरक्षायै परजनपदविलोपाय प्रभवतीत्यर्थः । **दैवकृतं** स्वर......(5)नैव **दुर्गं** देवखाततडागवत्कारयेत् परिखादिभिः संस्कारयेदित्य(6)[9B]र्थः । **चतुर्दिश**मित्युक्ते चत्वार्यंतपालदुर्गाणीत्यर्थापन्नम् । दुर्गस्य मूलप्रकृतयश्चतस्रः । औदकं पार्वतं धान्वनं वनदुर्गमिति ।

---

१ J वीर्यं । २ Svl., Jvl. देव° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्येकं द्वैविध्यादष्टौ दुर्गाणि तानि द(1)र्शयन्नाह ।*

अंतर्द्वीपं स्थलं वा निम्नावरुद्धमौदकम् । प्रास्तरं[1] गुहा वा पार्वतम् । निरुदकस्तंबमिरिणं वा धान्वनम् । खंजनोदकं[2] स्तंबगहनं[3] वा वनदुर्गमिति ॥ [२.३.३]

द्विधा(2)गता आपो यस्मिंस्तद्वीपम् । द्वीपस्यांतर्नदीस्रोतसामंतरे भव**मन्तर्द्वीप**मित्येकम् । **स्थलं** वा **निम्नेन** जलेना**वरुद्धं** दैववशात् । निम्नशब्देनात्र तात्स्थ्याज्जलमभिधी(3)यते । 'निम्नयोधिन' इति वचनात् । एवं द्विविधमुदकस्येद**मौदकम् । प्रास्तरं गुहा वा पार्वत**मिति । प्रस्तरे एकखंडे भवं प्रास्तरम् । **गुहा वा** गूहनात् गुहा । यत्र पर्वतश्चतुर्दिशं(4) वेष्टयित्वा द्वारमेकं मुक्त्वा गूहनात् सा गुहा । एवं द्विविधं **पार्वतम् । निरुदकं निस्तंबं** निस्तृणं निर्विटपं च एकम् । **इरिण**मूषरं यत्नोत्पादिततृणोदकमेवं द्विविधं **धान्वनम्** । 'निरु(5)दकोद्देशो धन्वे'त्याम्नायात् । **खंजनोदकं** 'खजिगतिवैकल्य' इति पाठात्, सपंकजलम् । **स्तंबगहनं** केवलवृक्षस्तंबगहनं **वा** एवं **वनदुर्ग**मपि द्विविधम् ॥ छ ॥

तेषां नदीपर्व(6)[10A]तदुर्गं जनपदारक्षस्थानम् । धान्वनं वनदुर्गमटवीस्थानमापद्य{प}सारो[4] वेति ॥ [२.३.४]

तेषां दुर्गाणां मध्ये **नदीदुर्गं पर्वतदुर्गं** च **जनपदारक्षा अंतपालाः, तेषां स्थानं** परप्रवेशनिषेधात् ।(1) **धान्वनं दुर्गं वनदुर्गं** च **अटवीस्थान**माटविकानां स्थानं जनपदरक्षार्थमेव । **आपद्यपसारो वा** आपदि पराभियोगलक्षणायां अपसारो वा कलत्रमपसार्य स्थाप्यत इति ।

म(2)ध्ये दुर्गविधानमाह ।*

जनपदमध्ये समुदायस्थानं स्थानीयं निवेशयेदिति ॥ [२.३.५]

सर्वलोऽनन्तरारीणां व्यवहितत्वात् **समुदय**मुदयहेतुत्वात् कोशस्तस्य **स्थानम्, स्था[नीयमि]**(3)ति । राज्ञः स्थानाय हितं **निवेशयेदि**ति । दुर्गं विधायेति भावः । दैवकृतं चेद्भवति संस्कुर्यान्न चेद्वक्ष्यमाणोपदेशेन कुर्यात् ॥ छ ॥

वास्तुकप्रशस्ते देशे नदीसंगमे ह्रदस्याविशोष्यस्यांके[5] सरसस्तडाँगस्य[6] वा वृत्तं दीर्घं चतुरस्रं वा वास्तुवशेनँ[7] वा प्रदक्षिणो(4)दकं पण्यपुटभेदनमंसपथवारिपथाभ्यामुपेतम्[8] ॥ [२.३.६]

वास्तुकप्रशस्ते देशे वास्तुविद्याविद्भिः श्लाघिते देशे **नदीसंगमे** दुर्गत्वाज्जलसौकर्यार्थं च । तदलाभे(5) **ह्रदस्याविशोष्यस्यांके सरसो** देवखातस्य **तडागस्य** वा मनुष्य-

---

१ J प्र°; Jvl. प्रा° । २ SJ ख°; Svl. खं° । ३ Svl., Jvl. स्थम्ब° । ४ S, Jvl. आपाद्यप्रसारो; Svl. आपद्य° । ५ S ह्रदस्य वा अविशोषस्याङ्के; Svl. घाटविशोषं; J वा विशोष° । ६ SJG तटा° । ७ SJG °स्तुकवशेन । ८ SJ °भेदनमंसवारिपथा etc.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खातस्यांक इति वर्त्तते । **वृत्तं** दीर्घवृत्तं वा । चतुरस्रं **दीर्घचतुरस्रं वा ।** दीर्घशब्दो मध्यस्थ[6] [10B] उभयत्र योज्यः । त्रिकोणार्द्धचंद्रादीनामप्रशस्तानां निवृत्त्यर्थं वा । **वास्तुवशेन वा** भूमिवशेन दीर्घत्वमपि भवतु । **प्रदक्षिणोदकं** प्रशस्तत्वात् । **पण्यपुटभेदनं** ततोऽन्यत्र न [1]पण्यपुटा भिद्यंत इति कृतनियमं पण्यानां संग्रहार्थम् । शुल्कस्य चाविनाशार्थम् । **अंसपथः** स्थलपथः पुरुषबलीवर्दोष्ट्राद्यंसैः स्कंधैरुह्यमानपण्यत्वात् । **वारिपथश्च ताभ्यामुपेतं** प[2]ण्यशुल्कसंग्रहार्थमेव ॥ छ ॥

तस्य परिखास्तिस्रो दंडांतरा द्विदंडांतरा वा कारयेत् ॥ [२.३.७]

तस्य स्थानीयस्य परि समंतात् खन्यन्त इति **परिषा(खा)स्तिस्र** इति न्यूनाधिकत्वे दोषदर्शनात् । **दंडांतरा** द्विच[3]त्वारिंशदङ्गुलहस्तेन चतुर्हस्तो दंडस्तत्प्रमाणतः परस्परांतर(रा?)ला: । अतो न्यूनान्तरा विशीर्यंते । अधिकांतराः परेषामाश्रया भवंति ॥ छ ॥

चतुर्दश द्वादश दशेति दंडान् विस्ती[4]र्णा विस्तारादवगाढाः पादोनमर्द्धं भूमिवशेन वा त्रिभागमूला मूल(ले) चतुरस्रा वा पाषाणोपहिताः पाषाणेष्टकाबद्धपार्श्वा वा तोयांतिकीरागंतुतोयपूर्णा वा सपरिवाहाः[5] पद्मग्राहवतीश्चेति ॥ [२.३.८]

अभ्यंतरे **चतुर्दश**दंडान् विस्तीर्णा, मध्यपरिखा **द्वादश**, बहिःपरिषा(खा) **दशदंडान् विस्तीर्णा** कार्या । न बाह्यतोयगणनाक्रमो गृह्यते । चतुर्दश दंडान् वि[6]स्तीर्णायां बाह्यपरिखायां गृहीतायामितरयोरध्यवसायो ग्रहणे भवतीति भावः । **विस्तारादवगाढाः पादोनमर्द्धं** चेति । चतुर्दशदंडविस्तीर्णायाः पादोनो विस्ता.........[7] दश दंडाः । अर्द्धं वा सप्त दंडाः । द्वादशदंडविस्तारायाः पादोनत्वं नव दंडाः । अर्द्धं वा षट् दंडाः । दशदंडविस्तारायाः सार्द्धसप्तदंडाः, पंचदंडा वा गांभीर्यमित्यर्थः । **त्रिभाग**[8] इति विस्तारादेव त्रिभागो **मूले** यासामूर्ध्वविस्तारादेव तृतीयभागो मूले विस्तारो भवतीत्यर्थः । तद्यथा चतुर्दशदंडायाश्चत्वारो दंडा हस्तद्वयमष्टाविंशत्यंगुला[9]......याश्चत्व(त्वा)रो दंडाः । दशदंडाया दंडत्रयमेको हस्तश्चतुर्दशांगुलानीति । मूल......[10] [11A].........पाषाणैरुपहिता वा दंडप्रमाणेष्वंतरालेष्वेव बद्धा दार्ढ्यार्थं तृणाद्यभावार्थ.........[1] मंतिके समीपे सिरागतं यासां **आगंतुकतोयपूर्णा वा** उद्भिजतोयाभावे सति पैरलक्ष्यमार्गा.........लक्ष्यमूलतां कर्तुं **सपरिवाहा** अधिकजलप......[2]रिवाहनार्थं सह परिवाहेन वर्त्तत इति । अन्यथान्योऽन्यसंप्लवो वप्रोपघातश्च स्यात् । **पद्मग्राहव**त्त्वे च दुःखावतारिणीं कारयेदिति संबंधः ।

वप्रविधानायाह ।*

चतुर्दण्डा[3]वकृष्टं परिखायाः षड्दंडोच्छ्रितमवरुद्धं [4]द्विगुणविष्कंभं खाताद् वप्रं कारयेदिति ॥ [२.३.९]

---

१ SJG द्विदंडांतरा वा dropped. २ SJG °गाधा° । ३ SJG भूमिवशेन dropped. ४ SJG तत् before द्वि° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुरो दंडानवकृष्याभ्यंतरपरिखायाश्चतुर्दंडप्रमाणमंतरं मुक्त्वेत्यर्थः । **षड्दंडो**[4] **च्छ्रितं** चतुर्विंशतिहस्तोत्सेधम**वरुद्धं** पाषाणादिभिर्बद्धोभयपार्श्वं पांशुविसरणनिषेधार्थम् । **द्विगुणविष्कंभमुच्छ्रयाद्** द्विगुणविस्तारं द्वादशदंडविस्तारमित्यर्थः । **खा**[5]**तादिति** खातोत्थपांशुभिर्वप्रं प्राकाराधिष्ठानं सेत्वाकारत्वाच्च **वप्र**शब्दप्रयोगः । तं **कारयेत्** ॥ छ ॥

ऊर्द्ध्वचयं मंचकपृष्ठं कुंभकुक्षिकं वा हस्तिभिर्गोभिश्च क्षुण्णं कण्टकि[6] **गुल्मविषवल्लीप्रतानवंतमिति** ॥ [२.३.१०]

ऊर्द्ध्वचयमंतरं मुक्त्वा चयाः शिलादीनां कर्त्तव्या दार्ढ्यार्थम् । ततश्च वल्मीकशिखराकारो भवतीति भावः । **मंचकपृष्ठं** मध्ये किञ्चिन्निम्नं प्राकार[7]दार्ढ्यार्थम् । **कुंभकुक्षिकमिति** । आयतशिलास्तंभवत्त्वात् कुंभसमानकुक्षिकश्चीयते । दुरारोहो भवत्विति । **हस्तिभिर्गोभिश्च क्षुण्णं** हस्तिभिर्महाकायत्वात् गोभिस्तीक्ष्णखु[3]रत्वात् घनत्वापादनार्थम् । **कंटकिनो** बदर्यादयः । **गुल्मा** भल्लातक्यादीनां(नि?), **विषाणि** हलिनीकरवीरादीनि, **वल्ल्यो** हस्तिवारुणीकरमर्दाद्यास्त**त्प्रतानवंतं** मूल इत्यर्थः ॥ छ ॥

पां[0][11B]**शुशेषेण**[2] **वास्तुच्छिद्रं राजभवनं**[3] **वा पूरयेत्** ॥ [२.३.११]

पांशुशेषेण च प्रपूरणावशिष्टपांशुभि**र्वास्तुच्छिद्रं** नगरवास्तुनिम्नं राजवास्तुनिशांतभूमिनिम्नं **वा पूरयेत्** । समत्वापादनार्थम्[1] ॥ छ ॥

वप्रस्योपरि प्राकारं विष्कंभद्विगुणोत्सेधमैष्टकं द्वादशहस्तादूर्द्ध्वमोजयुग्मं[4] **वा आचतुर्विंशतिहस्तादिति कारयेदिति** ॥ [२.३.१२]

उक्तलक्षणस्य **वप्रस्योपरि प्राकारं** प्रकृ[2]ष्टाकारं **विष्कंभद्विगुणोत्सेधमिति** विस्तारद्विगुणोच्छ्रायम् । अनुक्तोऽपि विष्कंभस्त्रयोदशविधः प्राकाराणां वक्ष्यमाणादुत्सेधात् प्रत्येकमर्द्धप्रमाणः कार्य इति व्यास्यर्थं वच[3]नम् । **ऐष्टकं** इष्टकचितम् । द्विचत्वारिंशदंगुलहस्तेन **द्वादशहस्ता**दावात् प्राकारादूर्द्ध्व**मु**परिष्टा**दोजं** विषमहस्तसंख्यं **युग्मं** समहस्तसंख्यम् । तद्यथा । त्रयोदशहस्त ओजश्चतु[4]र्दशहस्तो युग्मः, पंचदशहस्त ओज इत्येवं योज्यमा**चतुर्विंशतिहस्तात्** द्वादशहस्तादूनः चतुर्विंशतिहस्तादधिको न कार्य इति नियमः । ओजयुग्मग्रहणं च ह......[5]न्यूनेन वितस्त्यंगुलादिभिरुत्सेधवृद्धिर्न कल्पनीयेति ज्ञापनार्थम् । एवं च त्रयोदशैव प्राकारा भवंति । विष्कंभप्रमाणमपि षट्हस्तादित्यर्थादापद्यते । एवं ल......[6]कारयेत् ॥ छ ॥

रथचर्यासंचारं तालमूलं मुरजकैः कपिशीर्षकैश्चाचिताग्रमिति ॥ [२.३.१३]

रथचर्यासंचारस्य प्रमाणं पंचारत्निप्रमाणा वक्ष्यति । पंचारत्नयो रथपथ इ......[7][12A]मुरजक-कपिशीर्षकावरुद्धं प्रदेशं विहाय प्राकारमस्तके पंचारत्निप्रमाणोऽ-

---

१ SJG °क° dropped । २ SJ विशेषेण । ३ SJG राजभवनं dropped.
४ SJG ओजं यु° । ५ SJG आ seperated from चतु° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वकाशो योधानां संचारार्थं कार्यः । **तालमूलं** तालवृक्षाकारमूलं दार्ढ्यार्थम् । **मुरजकै**[1]-मुरजकाकारैर्योधावरणकुट्टाकैः **कपिशीर्षकैः** कपिशीर्षकाकारैस्तीक्ष्णाग्रैरेकजातीयैर्विमिश्रैर्वा **आचितमग्रं** बहिर्मस्तकधारा यस्य ॥छ॥

पृथुशिलासंहतं[1] वा शैलं[2] नत्वेव का[3]ष्ठमयं कारयेत्[3] । अग्निरवहितो हि तस्मिन् वसतीति ॥[२.३.१४]

संपत्तौ तु **पृथ्वीभिः शिलाभिः संहतं शैलं वा** प्राकारं कारयेत् । **न त्वेव काष्ठमयं कारयेत्** । **हि** यस्माद**ग्निर[वहितः]**[3]सन्निहित**स्तस्मिन् वसति** । अल्पेनापि यत्नेन परैर्निहितः सर्वं दहतीति भावः ।

प्राकारमस्तके युद्धार्थमट्टालकादिविधानायाह ।*

विष्कंभचतुरस्रमट्टालकमु[4]त्सेधसमावक्षेपसोपानं कारयेत् त्रिंशद्दंडांतरं चेति[4] ॥ [२.३.१५]

विष्कंभेन पंचारत्निप्रमाणेन समानाश्**चतस्रो**ऽप्यस्रयो यस्य त**मट्टालकम्** । 'अट्टातिक्रमहिंसयोरिति पाठा[5]त् । प्राकारातिक्रमं परहिंसां च आ समंताल्लातीत्यट्टालकः । प्राकारोपरि युद्धार्थं कोष्ठसन्निवेशः । तद्यथा । पंचारत्नस्तंभचतुष्टयोपरि तुलाफलकास्तारा-च्छादकक[6]पोतपाल्यादिपरिकरोर्द्ध्वं मुरजकपताकादिरचनोऽट्टालकः । **उत्सेधसमावक्षेपसोपान** इति । सवप्रस्य प्राकारस्य य उत्सेधस्तस्य समो योऽवक्षेपः तत्र सोपाना[7][12B]-न्यारोहणार्थं निश्रेणीपदानीव यस्य । तद्यथा । वप्रमूलात् प्राकारोत्सेधं यावदायातं सूत्रमवक्षिप्यान्तर्मुखं तत आरभ्य सोपानानि क्रियंते । ततश्चायुधव्यापृतोभयकराणा[1]मपि योधानामारोहणं सुखेनैव संपद्यत इति भावः । तमेवंभूतं कारयेत् । **त्रिंशद्दंडांतरं च** त्रिंशत्त्रिंशद्दंडा अंतरं यस्य । जातावेकवचनम् । यावत्प्राकारस्यायतत्वं [त]त्र[2]त्रिंशत्त्रिंशद्दंडेष्वट्टालकः कर्तव्य इत्यर्थः । एवमट्टालकयोः सर्वत्र त्रिंशद्दंडमंतरं कर्त्तव्यमिति भावः ॥ छ ॥

द्वयोरट्टालकयोर्म्मध्ये सहर्म्यद्वितलामध्यर्धा[3]यामां[5] प्रतोलीं कारयेत् ॥ [२.३.१६]

द्वयोरिति वीप्सा द्रष्टव्या । द्वयोर्द्वयो**रट्टालकयोर्म्मध्ये** त्रिंशद्दंडांतरे **सहर्म्यद्वितलां** ह[र्म्यमुत्तरा]गारं घंटाद्युपेतं तेन[4] सह द्वे तले यस्यास्ताम**मध्यर्द्धायामाम्** । अट्टालकः समचतुरस्रो भवति । तदपेक्षयाऽध्यर्द्धायामामर्द्धेनाधिक आयामो भवतीत्यर्थः । त[5]द्यथा । पंच[ा]रत्निविस्तार आयामस्तदर्द्धेनाधिक आयामो भवतीत्यर्थः । आयतचतुरस्रा प्रकर्षेण तोल्यते परानीकमस्यां स्थितैरट्टा[6][13A]लाधिकोत्सेधायामिति **प्रतोली** तां **कारयेत्** ॥छ॥

१ SJ सहितं; G संहितं । २ SJG कारयेत् after शैलं । ३ SJG कारयेत् dropped. ४ SJ Sutra ends at कारयेत्; त्रिंशद्दडा° read with the following sutra. ५ SJ द्वितलां द्व्यर्धायामां; Jvl. °मर्धायामां ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अट्टालकप्रतोलीमध्ये त्रिधानुष्काधिष्ठानं सपिधानं छिद्रफलकसंहतमिंद्रकोशं[2] कारयेत् ॥[(1)] [२.३.१७]

अट्टालकप्रतोलीमध्ये सार्द्धदशांगुलोपेतचतुर्दशदंडप्रमाणेऽत्रापि वीप्सैव **त्रिधानुष्काधिष्ठानं** पंचारत्निधनुस्तत्र धन्विनं स्थापयेदिति वचनात् । त्र[(2)]याणामधिष्ठानं पंचदशहस्तायतं भवति । **सापिधानैश्छिद्रफलकैस्संहतम्** । सच्छिद्रफलकत्वं शरनिर्गमार्थं सापिधानत्वं परशरप्रतिस्खलनार्थम् । **इंद्रकोशं** इंद्राका[(3)]रः कोशः । अक्षिसमानसहस्रच्छिद्रोपेतत्वात्तं **कारयेत्** ॥ छ ॥

अंतरेषु द्विहस्तविष्कंभं पार्श्वे चतुर्गुणायामं[3] देवपथं[4] कारयेत् ॥ [२.३.१८]

अंतरेषु स(सा?)र्द्धैकत्रिंशदंगुलाय[(4)]तपंचदंडेषु **द्विहस्तविष्कंभम्** । **पार्श्वे** प्राकारबहिःपार्श्वे **चतुर्गुणायामं** अष्टहस्तं सारदारुमयम् । ताम्रपत्रिकाबद्धमधःकृतशरमार्गं सर्वतः छादितं **देवपथ**मा प्रवे[(5)]शनिर्गमत्वात् प्राकारमूलरक्षणार्थं **कारयेत्** ॥छ॥[(6)] [13B]

दंडांतरा द्विदंडांतरा वा चर्याः[5] कारयेत् ॥ [२.३.१९]

दंडांतरा चतुर्हस्तांतरा **द्विदंडांतरा वा** अष्टहस्तांतराश्चर्या उत्सेधसमावक्षेपसोपाना अस्यांतरतः **कारयेत्** प्राकारारोहणार्थम् । प्राकारं समालक्ष्य...... । अट्टा[(1)]लकसोपानानि तु महान्ति एकदैव बहुपुरुषारोहणार्थानि । चर्यारूढाश्च योधाः कपिशीर्षकाच्छादिता युध्यंते ।

अग्राह्ये देशे प्रधावनिकं[6](कां) निष्किरद्वारं[7] चेति ॥ [२.३.२०]

महाखातवप्रयोर्म[(2)]ध्ये चतुर्दंडप्रमाणेऽवकाशे गोमूत्रिकाकारा पुरुषप्रमाणमुंडप्राकारेणाग्राह्ये परेषां निष्किरद्वारैर्निर्गत्य परिखारक्षार्थं प्रधावंति योधा अस्यामिति **प्रधावनिकां** कारयेत् ।[(3)] **निष्किरद्वारं च** अग्राह्य एव **देशे** देवपथस्याधस्तात् प्राकारकुक्षिप्रदेशेषु, निष्किरद्वारं निष्कीर्यंते बहिःपरिखारक्षार्थं योधा येन तदारोहणावतरणार्थं कृतं तिर्यक्प्राकार[(4)]बाह्यभित्तिषु स्वल्पतरसोपानं कालायसदृढकपाटं कारयेत् । जातावेकवचनम् । वक्ष्यति च दुर्गलंभोपाये 'निष्किराद्‌उपनिष्क्रम्य दुर्गस्थान् घातयेदि'ति ।

परिखादीनां रक्षा[(5)]र्थमाह ।*

---

१ Svl. G सा°; S, J स° । The Ms. here reads स° but in the comm. सा° । २ SJG °मितीन्द्रकोशं । ३ SJG °गुणायाममनुप्राकारमष्टहस्तायतं । ४ The Ms. reads देवपकथं । ५ SJ चार्याः; Svl. चर्यां; G वाचार्यां but in his comm. he seperates वा from चार्याः, the latter explained as आरोहावरोहे भूमिः । T चार्य=paths । ६ SJG प्रधावितिकां । ७ SJ निष्कुर°; Svl. निष्कर; G निष्कुहद्वारं=कोटरविवरं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहिर्जानुभंजनी[1]शूलप्रकरकूपकूटा[2]वपातकंटकप्रतिसराहिपृष्टतालपत्रशृ-ङ्गाटकश्वदंष्ट्रार्गलोपस्कन्न[3]पादुकांबरीषकोदपानकैः[4] प्रतिच्छन्नं[5] छन्नपथं का(6)रयेत् ॥ [२.३.२१]

बहिर्जानुभंजनीति जानुभंजनप्रयोजना सचक्राष्टपादसमन्विता सरभस्येवाधश्चत्वार ऊर्ध्वं......ति सा यं......भंजनं करोतीति। **शूल[प्रक]**(7)**रकूप**सारदारुमयशूलप्रकरोपलक्षितकटपांशुच्छादितकूपैः **कूटा**नि मृगपक्षिवधार्थमिव.........बंधनार्थमित्र कृता ग(8)र्त्ताः, **कंटकप्रतिसरा** अयोमयकंटकमाला, **अहिपृष्टं** निर्मांसाहिपृष्ठसमानमयोमयमेव। ....ति। **शृंगाटक**(9)[14A]**श्वदंष्ट्रा** लोहमय्यो हस्तिगतिस्खलनाय। **अर्गलाः** सारदारुमय्यो यंत्रेण निपातिता मार्गनिरोधं कृत्वा तिष्ठंति.........देशैर्वा **पादुका** प(1)दप्रमाणा गर्त्ता वितस्त्यवगाढा यत्र पतितः पादोऽस्थान एव भज्यते। **अंबरीषो** निर्धूमः कारीषाग्निः......शयाः, तैश्छन्नमिति निरंत(2)रं व्याप्तम्। **छन्नपथ**मिति कटपांशुभिः प्रच्छादितत्वात् परैरलक्ष्यत्वादापदि रात्रौ गूढं पिहितत्वाच्च तं छन्नपथं......दिति।

.........दिद्वाराण्याह।*

प्राकारमु(3)भयतो मेंढक[6]मध्यर्द्धदंडं कृत्वा प्रतोलीषट्तुँलांतरं द्वारं निवेशयेदिति ॥ [२.३.२२]

प्राकारस्य द्वारप्रतोलीक्षेत्रमात्राविशेषितभूप्रदेशस्य, उभययोगे षष्ठ्यपवादे द्वितीया, तम्।(4)**उभयत** इति उत्तरद्वारे पूर्वापरयोः, पूर्वद्वारे दक्षिणोत्तरयोः, दक्षिणद्वारे पूर्वपश्चिमयोः, पश्चिमद्वारे दक्षिणोत्तरयोः, प्राकारोत्सेधयोरुभयत इति योज्यम्। **मेंढ**(5)**क**मिति वास्तुशास्त्रे लोके च मेषस्य संज्ञा। तत्र श्रृंगाकारग्रहणार्थमुपादानं कपिशीर्षकसुरजादिवत्। मेषश्रृंगद्वयसंस्थानं द्वारशुषिराभिमुखाग्रबाहुप्राकारं तयो.........(6)रतोऽपि कृत्वा मेंढकाकारप्रतिपादने च निराश्रितत्वात् प्राकारकोणेनादार्ढ्यार्थं भवति इति भावः। **अध्यर्द्धदंडमिति**। षट्हस्तविष्कंभं आयामस्तु द्वारक्षेत्रत एव सिद्धः......(7)सुभयमेंढकश्रृंगचतुष्टयमध्येऽष्टहस्तं द्वारमार्गावकाशं मुक्त्वा कार्य इत्यर्थः। तमेवंविधं मेंढकं कृत्वा **प्रतोलीषट्तुलांतरं द्वारं निवेशयेदि**ति संबंधः। प्रतोल्याः ष......(8)नामंतराणि यस्मिन् कपाटयुगद्वितयांतरे तत्प्रतोलीषट्तुलांतरं द्वारं निवेशयेत्।

प्रतोलीक्षेत्रस्य प्रमाणमाह*।

पंचदंडादेकोत्त(9)[14B]रमा अष्टदंडादिति चतुरस्रं षड्भागमायामादधिकमष्टभागं वेति ॥ [२.३.२३]

द्वादशहस्तोत्सेधस्य प्राकारस्य **पंचदंडं** द्वारक्षेत्रम्। तस्मा**देकोत्तर**मिति एकैकेनांशोनोत्तरमा **अष्टदंड**......(1) च दंडस्योपरि दंडत्रयमधिकम्, तच्च द्वादशधा क्रियमाणं

---

१ S भगिनीं; Svl. भयञ्जनी; J भञ्जनीं; T भञ्जनी। २ SJ त्रिशूलप्रकारकूटा°; G त्रिशूल°। ३ SJG °स्कन्दन°। ४ SJG अम्बरीषोदपानकैः। ५ SJG प्रतिच्छन्नं dropped. ६ SJ मण्डलक; Svl. मण्डक; G मण्डपक। ७ G तलान्तरं। ८ The Ms. reading after पंचदंडा is not quite clear. 'देकोत्त' can be read with the help of the other texts. After it SJG read °वृध्याऽऽष्ट°। ९ S गा°, Jvl. गा, गमसा°।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हस्तमात्रमेव भवति। ततश्च प्रथमप्राकारे पंचदंडं, द्वितीये हस्तोत्तरं, तृतीये द्विहस्तोत्तरं, चतुर्थे त्रिहस्तोत्तरं, पंचमे......[2]डमेवं चतुर्विंशतिहस्तेऽष्टदंडकमिति। **षड्भागमायामादधिकमष्टभागं वा** स्वकीयस्वकीयप्रमाणात् षड्भागमायामादधिकमष्टभागं वा। पंचदंडे आयामे षड्भागो हस्तत्रयं चतुरं[3]गुलानि। अष्टमभागः सार्द्धहस्तद्वयमित्येवं द्वादशस्वपि क्षेत्रेषु योज्यम्।

तथैव द्वारतलस्योत्सेधं त्रयोदशविधमेव दर्शयन्नाह।*

पञ्चदशहस्तादेकोत्तरमा [1]अष्टादशहस्तात्[4] [2]तलोत्सेधः ॥ [२.३.२४]

मेंढकप्राकारस्यायमुच्छ्रयो द्रष्टव्यः। तन्मस्तक एव यस्मात्तलं तस्य तलोच्छ्रयः। सार्द्धे द्व......रुत्तर.........ह्यम्॥ छ॥

स्तंभस्य परिक्षे[3]पाः षडाया[5][4]मा द्विगुणो निखातश्चूलिकायाश्चतुर्थो भागो वेति[5] ॥ [२.३.२५]

द्वादशहस्तोत्सेधे प्राकारे द्वादशहस्तोत्सेध........द्वारग्रहतुलापिंडपल......[6]-स्तारभूमिकाबंधादौ द्रष्टव्यम्। तलोच्छ्रयवृद्ध्यैव स्तंभोच्छ्रयवृद्धिर्व्याख्याता। स्तंभस्थौल्यमाह। **स्तंभस्य परिक्षेपाः**......[7][15A] द्वादशहस्तायामस्य द्विहस्तं स्थौल्यं भवतीत्यर्थः। स्तंभायामस्य षष्ठोंशो विष्कंभ इति भावः। **द्विगुणो निखा**......। न त्वेव काष्ठमयं कार[1]-येत्। अग्निरवहितो हि तस्मिन् वसतीति वचनसामर्थ्यात्। प्रतोल्यां सकलकाष्ठं ताम्रवेष्टितं द्रष्टव्यम्......परिक्षेपचतुर्थभागप्रमाणं भवति।[2]

एवं द्वारनिवेशमभिधाय मेंढकप्राकारमस्तकनिविष्टस्यादितलविधानमाह*।

आदितलस्य पंचभागाः शाला वापी सीमा [गृहं च। दशभागिकौ][6] द्वौ प्रतिमंचौ ॥ [२.३.२६]

तद्यथा।

एवं भागा[3]स्तले कार्याः प्रत्यंशं पंचकोष्ठकाः।
यथायोगं विभागोऽत्र शालासीमागृहादिषु॥
कोष्ठकस्य त्रिभिस्त्र्यंशैः कोष्ठको जायतेऽत्र तु।
त्रिभिः षडंशैः कोष्ठार्द्धं पादोऽपि द्वादशांशकैः॥
......[4]कोष्ठत्रयं त्र्यंशैरुभयोः पार्श्वयोरपि।
पंचकोष्ठा भवेद्वापी मध्यस्थं कोष्ठकत्रयम्॥

द्वारबंधप्रदेशस्तलव्यपदेशं न लभते। जनावकाशप्रदेशाभावात्। **आदितलस्य** पंच.........[5] प्रमाणस्य **पंचभाग** आयामेन विंशत्यादिहस्तविष्कंभेन दंडादिप्रमाणोऽभ्यंतरभागावस्थितः। **शाला** प्रहरणावरणादिस्थानम्। शालाग्रतः स्थितं षडंगुलांतरं शुषिरं **वापी**......[6]रत्वात्। यया प्रविशतः शत्रूनुपरिस्थिताः प्रहरंति। अग्रस्थितः शालाप्रमाणो भागस्सीमागृहम्। बाह्याभ्यंतरभागयोः सीम्नि स्थितत्वात्। [7][15B] **सीमागृहं** युद्धार्थम्।

१ S माऽष्टादश°। २ G तु°। ३ Svl. क्षेप। ४ SJ °डायामो। ५ SJG वा dropped. ६ G समत्तवारणौ after दशभागिकौ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

युद्धार्थौ **दशभागिकौ द्वौ प्रतिमंचौ ।** †अर्द्धदंडादिप्रमाणौ वापीभागस्योभयतः द्वाररक्षकावस्थानभूतौ प्रतिमंचौ प्रविशतां परिज्ञानार्थम् । आदितलस्य ।

......[1]धा कृत्वा वाप्याः पार्श्वद्वयेऽपि च ।
प्रतिमंचौ च तौ कार्यौ गोप्तॄणां स्थितये सदा ॥

प्रविशतां परिज्ञानार्थम् ॥ छ ॥

अंतरमाणी[1] हर्म्यं चेति ॥ [२.३.२७]

शाला - वापी - सीमागृहप्रतिमंचावरुद्धप्रदेशे.........[2] **मंतर**मित्युच्यते । तत्र **आणी** इत्याणिद्वयं सोपानमार्गद्वारद्वयमित्यर्थः । शेषप्रदेशद्वये **हर्म्यं** रक्षकशयनासनार्थं धवलगृहम् ।

द्वितीयतलविधिमाह ।*

समुच्छ्रयादर्द्धतले स्थूणा[3]बंधश्चेति ॥ [२.३.२८]

समुच्छ्रयात् पंचदशहस्तादर्द्धं सार्द्धसप्तहस्तः समुच्छ्रयः । उच्छ्रयापेक्षयाऽ**र्द्धतल**मुच्यते । क्षेत्रं त्वादितलसमानम् । **स्थूणाबंध**श्चात्र स्थूणाः क्षुद्रस्तंभा आदितलस्योपरि स्थूणा......[4]न्यासं कृत्वा, बंधो द्वितीयतलबंधः । स्तंभतुलादिभिः कार्य इति वाक्यशेषः॥छ॥

अर्द्धवास्तुकमुत्तमागारं[2] त्रिभागान्तरं वेति ॥ [२.३.२९]

.........णवास्तुतश्च भूतलं चार्द्धप्रमाण......[5]तीयतलमित्यर्थः । **उत्तमागारं** च घंटाकलशादिरचनया, **त्रिभागांतरं वा** द्वितीयतलात्तृतीयतलं त्रिभा............[6] कर्त्तव्यमित्यर्थः ॥ छ ॥

इष्टकावबद्धपार्श्वं[3] वामतः प्रदक्षिणसोपानमिति ॥ [२.३.३०]

इष्टकावबद्धपार्श्वमिति काष्ठ......[7]निषेधार्थं **वामत** इति द्वारनिर्गमे भागे । **प्रदक्षिणसोपान**मिति । पश्चिममेंढकभित्तेरारभ्य पश्चि......[8]मेंढककभित्तिलग्नानि द्वारं यावत्सोपानकानि धीयंत इत्यर्थः ॥ छ ॥

गूढभित्तिसोपानमितरतः[9] [16A] द्विहस्तं तोरणशिरः । त्रिपंचभागिकौ द्वौ[4] कपाटयोगौ, द्वौ[6] परिघाविति ॥ [२.३.३१]

दक्षिणतोऽभ्यंतरभागे **गूढ**मेंढक......[1]कभित्तौ **सोपानं** कार्यम् । गूढप्रवेशनिर्गमार्थम् । **द्विहस्तं तोरणशिर** इति । उत्तरदेहल्यां द्विहस्तं शुषिरं मुक्त्वा......[2]करतोरणं विधातव्यम् । वातप्रवेशनार्थं शरमोक्षार्थं च । **त्रिपंचभागिकौ द्वौ कपाटयोगाविति ।** पंचधा वि......[3] अंतर्बहिश्चैकैकं पंचभागं परित्यज्य मध्यमास्त्रयः पंचभागा अंतरंगयोः कपाटयोगयोस्तौ त्रिपंच[भागिकौ द्वौ कपाट]योगौ.........पंचमयोश्च पंचमभागयोः संधौ भ[4]वत इत्यर्थः । कपाटयोगद्वयग्रहणं द्विर्बद्धं सुबद्धं भवतीति । **द्वौ परिघौ** प्रत्येकमित्यर्थः । समंततः कपाटोपघातकं हंतीति परिघा......कपाटयोर्म्मध्ये त्रिभागपार्श्वे अभ्यंतरतः स......[5]म्य भवतः । द्वितीयस्यापि तथैव ॥ छ ॥

---

† 'सपाददंडादिप्रमाणौ' पाठांतरम् । These words are written in the upper margin of the leaf. १ SJ अंतरामणि; G अंतरम् आणिः । २ SJG आर्धं° । ३ SJ बन्ध । ४ Svl. द्वौ द्वौ । ५ SJG °वा° । ६ SJG द्वौ द्वौ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अरत्निरिंद्रकीलक[1] **इति ॥ [२.३.३२]**

चतुर्विंशत्यंगुलो लौहः कपाटयुगसंधिमाक्रम्याधोदेहलीविवरं प्रविशति कीलस्तस्मिन् इंद्रजिता किलेंद्रो बद्ध इं[(6)]**द्रकील** इत्युच्यते। ऊर्द्धभागेऽपीष्यते, मस्तककीलाख्यः ॥ छ ॥

पंचहस्तमाणिद्वारमिति[2] **॥ [२.३.३३]**

कपाटयोगयोरेकैकवामकपाटे **पंचहस्तोत्सेधं आणिद्वारं** क्षुद्रकद्वारमित्यर्थः । ......[(7)]तेऽपि द्वारे प्रवेशनिर्गमार्थं अत्रापि कपाटार्गलादिकं चार्थप्राप्तं कपाटानां च लोहकंटकचितत्वमर्थापन्नम्, दुर्गविधानप्रस्तावात् ॥ छ ॥

चत्वारो हस्तिपरिघा इति ॥ [२.३.३४]

कपाटरक्षार्थं......[(8)]हस्तिनामसाध्याश्चत्वारः परिघाः हस्तिनिवारणार्थं **हस्तिपरिघाः** ॥ छ ॥

निवेशार्द्धं[3] **हस्तिनखमिति**[4]‡ **॥ [२.३.३५]**

निवेशः प्रतोल्याः पंचदंडादिस्तदर्द्धं सार्द्धदंडद्वयादि **हस्तिनखं** देहलीतो......[(9)] [16B] कारेण क्रमान्निम्नं शिलामयम् ॥ छ ॥

मुखसमः संक्रमः संहार्यो[5] **भूमिमयो वा निरुदक इति ॥ [२.३.३६]**

मुखं द्वारशुषिरं तत्**समः** परिखासु **संक्रमो** मार्ग इत्यर्थः । अधिकस्य प्रयोजनाभावात् ।......[(1)] रुषा मुखे मांति तावतामेव परिखासु संक्रमणं युक्तम् । स च **संहार्यः** काष्ठयंत्रादिना सोदके खातप्रदेशे, **भूमिमयो वा निरुदके** । तावतीं भूमिमपहाय खातव्यमित्यर्थः । प्रतोली.........[(2)]शेषमाह ।*

प्राकारसमं मुखमवस्थाप्य त्रिभागगोधामुखं[6] **गोपुरं कारयेदिति ॥ [२.३.३७]**

मुखमादितलादधःशुषिरं तच्च द्वादशहस्ते प्राकारे पंचदशहस्तं 'पंचदशहस्तस्तलोत्सेध' इति व[(3)]चनात् । अत्र गोपुरे **प्राकारसम**मेव **मुखं** कर्त्तव्यम् । द्वादशहस्ते प्राकारे द्वादशहस्त एव मेंढकः । दशहस्ताः स्तंभाः हस्तद्वयं च स्तंभोर्द्धपरिकरस्य । एवं सपरिकरः स्तंभोऽपि द्वादशहस्त......[(4)] एवं प्रतोलीतस्त्रिहस्तान्न्यूनोच्छ्र्यमित्येको विशेषः । **त्रिभागगोधामुख**मिति त्रिभागं क्षेत्रस्य पंचदंडा...मग्रतोधि......मुखाकारो मेंढकप्राकार एव ....[(5)]यो योधानां युद्धसौका(क)र्यार्थं द्वाररक्षातिशयार्थं च । प्रायो विवीताभिमुखं गवामेतत् द्वारमिति **गोपुरं**......टकयोः शृंगाटकाकारेण वि......[(6)] तयोर्गोधामुखाकारं द्वारं भवति तत् कारयेत् । शेषं प्रतोलीसमानम् ।

---

१ SJG क dropped. २ SJG °मणि°; Svl. °माणि° । ३ SJ °शार्धं । ४ SJG °नखः । ‡ SJG read this Sutra with the following मुखसमः etc. ५ SJG संक्रमोऽसंहार्यो वा भूमि etc. ६ J suggests to read त्रिभागमधोमुखं for गोधामुखं and translate "Gopura is to be in three parts and with its entrance below."

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पु[(7)] [17A] ष्करिणीद्वारमाह ।*

प्राकारमध्ये वापीं कृत्वा[1] पुष्करिणीद्वा[2]रम् ॥ [२.३.३८]

प्राकारयोर्मेंढकयो**र्म्मध्ये** यच्छुषिरं तत्सम......फलकास्तारो भूमिकावंधो......[(1)] युद्धसौका(क)र्यार्थमनेनैव विशेषेण प्रतोल्येव **पुष्करणीद्वार**मित्युच्यते। चतुरस्रा वापीत्युच्यते......चतुरस्रा तु......णीत्येकोऽर्थः ।

कुमारीपुरमाह ।*

चतुः[(2)]शालमध्यर्द्धविवृतांतरं साणिकं[3] कुमारीपुरमिति ॥ [२.३.३९]

चतस्रश्चतुर्दिशं शाला एव कार्याः । न सीमागृहव्यपदेशः । प्रतोल्यपेक्षया अन्तरमर्द्धेनाधिकं वापीस्थाने विधेयम्, प्रतिमंचक......[(3)]पनीय तत्क्षेत्रमपि वापीमध्ये प्रक्षिप्यैवम**र्द्धेनाधिकमंतरं** भवति । तच्च **साणिकं** आणियुक्तं तुलाफलकांतरे छिद्रयुक्तं युद्धसौकर्यार्थं **कुमारीपुर**मिव सर्वतः कुड्यमुक्त......[(4)]नं शेषप्रतोलीसमानमिति ।

मुंडकद्वारमाह ।*

मुंडहर्म्यद्वितलं[4]मुंडकद्वारमिति ॥ [२.३.४०]

मुंडेनोत्तमागाराभावात् । **हर्म्यद्वितलेन** युक्तं प्रतोलीद्वारमिव **मुंडकद्वारम् ।** यथा......[(5)]रहितो मुंड इत्युच्यते । तथा द्वारमप्युत्तरागाररहितमिति ।

पंचद्वारभेदानभिधाय सर्वापवादमाह ।*

भूमिद्रव्यवशेन वा निवेशयेदिति† ॥ [२.३.४१]

भूमेः समत्वं विषमत्वं च......[(6)] [17B]निम्नता च दुर्गा भूमिस्तदैकयैव परिखया पर्याप्तमथ समा तदा पंच सप्त वा परिखाः कारयेदिति मानवाः ।[(1)] यदि **द्रव्यं** काष्ठहिरण्याद्यधिकं तदा उक्तादधिका अपि विशेषात् । न्यूने द्रव्ये न्यूना इति । निवेशयेद्दुर्गमिति वाक्यशेषः ॥ छ ॥

प्राकाराद्यारूढयोधरणोपकरणस्थानार्थ...... ।*

[त्रिभा][(2)]गाधिकायामा[6] भांडवाहिनीः कुल्याः कारयेदिति ॥ [२.३.४२]

यदि दशहस्तो विष्कंभस्तदा पंचदशहस्त **आयाम** इत्यादि । **भांडं** रणोपकरणं तद्वहंति चाविच्छिन्नतया निर्व्यूढेऽन्यदाधेयमि[ति]......[(3)]**कुल्यासु** जलमविच्छिन्नं तथात्र भांडमिति । **कुल्या**व्यपदेशो भांडशालानाम्, ताश्चानुप्राकारमंतः **कारयेत् ।**

यद्वहंति तास्तदिदानीं भांडमाह* ।

---

१ SJG कृत्वा वापीं । २ S पुष्करिणीं द्वारं; Svl. °णीद्वारं; J reads पुष्करिणीं; but reads द्वारं with the following sutra चतुः शालमध्यर्धान्तराणीकं, and says it should be read as सद्वारं चतुःशालमध्यमर्धान्तराणीकं । ३ SJ °र्धान्तराणीकं° Svl. °र्धाववृत्तान्तरमाणिकं; G °र्थान्तराणिकं । ४ SJG हर्म्यं द्वितलं; Svl. हर्म्यद्वितलं । † SJ read this Sutra with the following. SJG निवेशयेत् dropped. ५ A part of the उत्थानिका is lost But SJG read the Sutra with त्रिभागा°; so does the commentary. ६ SJ यामाः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तासु पाषाणकुद्दालाः[1] कुठारीकांडक[ल्पनाः] ।[(4)]
मुषुंढी[2]मुद्गरा दंडा[3]श्चक्रयंत्रशतघ्नयः ॥
कार्याः क[4]र्म्मारिकाशूला[5]वेधनाग्राश्च वेणवः ।
उष्ट्रग्रीव्यग्नि[6]संयोगाः कुप्यकल्पे च यो विधिः[7] ॥ [२.३.४३]

तासु कुल्यासु **पाषाणा** हस्तयंत्रादिक्षेप......[(5)]लाः खननयुद्धार्थाः, **कुठार्य**-च्छेदनयुद्धार्थाः, **कांडकल्पनाः** शरसंस्कारोपकारणानि । **मुषंढ्यो**ः गदादि...... । **मुद्गरा** रजकमुद्गराकाराः प्रहरणविशेषाः, **दंडा** लोहदारुमया... [**चक्रा**][(6)]**णि** हस्तयंत्रक्षेप्याणि, **यंत्राणि** जामदग्न्यसर्वतोभद्रबहुमुखादीनि, बाणपाषाणादि......चिताशतं हंतीति...... **कर्म्मारिका** इत्ययस्कारघटिताः, **शूलावेधनाग्राश्च**क्रकाख्याः, **वेणव उष्ट्रग्रीवा**कार... **दुर्गलंभे**.........[(7)]नैर्यंत्रैस्तैलादिकानि यैः क्षिप्यंते । **कुप्यकल्पे च** कुप्यानां कल्पना...[(8)]

.........[इति मुग्धविलासाङ्कयोग्घमविरचित][(8)][18A]नीतिनिर्णीत्यभिधानायां कौटलीय-राजसिद्धान्तटीकायामध्यक्षप्रचारे तृतीयोऽध्यायः ॥

[अथ दुर्गनिवेशनामा चतुर्थोऽध्यायः ।]

.........[(1)]विधीयत इति सूत्रार्थः । संबंधस्तु विहितमपि दुर्गमनिविष्टमनुपयोग-......[(2)]नामा कश्चिद्देवविशेष इति प्रतिकूलत्वात्सर्वैर्देवैर्विजित्योत्तानः पातितस्तस्य......दग्रे ब्रह्मा स्थितः । देवो......[(3)]दंगमवष्टभ्य स्थितः । स तत्रस्थः पूज्यते । तस्य मर्मसिरा-वंसादि परित्यज्य निवेशः क्रियमाणः प्रशांतो भवतीति । **वास्तुविभागः** कर्त्तव्य इति शेषः । **त्रयः प्राचीना राजमार्गा**......[(4)]र्वाभिमुखमंचतीति । **त्रय उदीचीना** उदग्मुखाः प्रागुदग्ग्रहणं मंगल्यार्थम् । ते चैकाशीति पदे नवनवकविभक्ते वास्तुनि द्रष्टव्याः । वास्तुहृदया-दुत्तरे नवभागे यथोक्त...........[(5)]पुरविधानमिति वचनसामर्थ्यात् । नह्येकाशीति पदं विहाय नवभागसंभवः । तथा चोक्तम् ।

"दश पूर्वायता वंशा दश चैवोत्तरायताः ।
नवभागकृता ज्ञेयाः पदानां नव...........[(6)] ॥

दश पूर्वामुखान्यनुवंशे सूत्राणि प्रसार्य दशैवोदग्मुखानीति । चतुरस्रपादानां नवनवका भवंति । नवके नवके मध्यमे पदे मर्मत्रिमर्मोर्द्ध्वगामिनः.........[(7)][रा]जमार्गास्तथैव त्रय उदीचीनास्ते च महामर्म्मरूपा वंशाः । तथा चोक्तम् ।

वंशमेकहृदयं नवमर्म्म चतुःशिरम् ।
उत्तानसंस्थितं विद्धि पुरुषं वास्तुक........ ॥[(8)][18B]

[इतोऽग्रे मूलादर्शस्त्रुटितः ।]

*

१ SJG कुद्दालकुठारी° । २ SG मुसण्ठि Svl. मुसुण्ठी । J भुशुण्डी । ३ SJG दण्डचक्र । ४ SJG का° । ५ G शूलु° । ६ SJG °ग्रीव्योऽग्निसंयोगाः । ७ S,Jvl. योऽवधिः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कौटलीयमर्थशास्त्रम् ।

३३६४

*

विनयाधिकारिकम् — प्रथमाधिकरणम् ।

[प्रकरणाधिकरणसमुद्देशः ।]

*

†ॐ नमश्शुक्र-बृहस्पतिभ्याम् ।

पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम् । तस्यायं प्रकरणाधिकरणसमुद्देशः—

विद्यासमुद्देशः ॥[१] वृद्धसंयोगः ॥[२] इन्द्रियजयः ॥[३] अमात्योत्पत्तिः ॥[४] मन्त्रिपुरोहितोत्पत्तिः ॥[५] उपधाभिश्शौचाशौचज्ञानममात्यानाम् ॥[६] गूढपुरुषोत्पत्तिः ॥[७] गूढपुरुषप्रणिधिः ॥[८] स्वविषये कृत्याकृत्यपक्षरक्षणम् ॥[९] परविषये कृत्याकृत्यपक्षोपग्रहः ॥[१०] मन्त्राधिकारः ॥[११] दूतप्रणिधिः ॥[१२] राजपुत्ररक्षणम् ॥[१३] अवरुद्धवृत्तम् ॥[१४] अवरुद्धे वृत्तिः ॥[१५] राजप्रणिधिः ॥[१६] निशान्तप्रणिधिः ॥[१७] आत्मरक्षितकम् ॥[१८] इति विनयाधिकारिकं प्रथमाधिकरणम् ॥† [१ द्वि.]

जनपदविनिवेशः ॥[१] भूमिच्छिद्रा[1]पिधानम् ॥[२] दुर्गविधानम् ॥[३] दुर्गनिवेशः[2] ॥[४] सन्निधातृ[3]निचयकर्म ॥[५] समाहर्तृसमुदयप्रस्थापनम् ॥[६] अ[4]क्षपट[5]-गा[6]णनिक्य[7]धिकारः ॥[७] समुदयस्य युक्तापहृतस्य प्रत्यानयनम् ॥[८] उपयुक्तपरीक्षा ॥[९] शासनाधिकारः ॥[१०] कोशप्रवेशः[8] ॥[११] रत्नपरीक्षा ॥[१२] आकारकर्मान्तप्रवर्तनम् ॥[१३] अक्षशाला[9] ॥[१४] सुवर्णाध्यक्षः ॥[१५] विशिखा(खा)यां सौवर्णिकप्रचारः ॥[१६] कोष्ठागाराध्यक्षः ॥[१७] पण्याध्यक्षः ॥[१८] कुप्याध्यक्षः ॥[१९] आयुधागाराध्यक्षः ॥[२०] तुलामानपौतवम् ॥[२१] देशकालमानम् ॥[२२] शुल्काध्यक्षः ॥[२३] ...व्यवहारः[10] ॥[२४] सीमा[11]ध्यक्षः ॥[२५] ... ॥[२६] सुराध्यक्षः ॥[२७] सूनाध्यक्षः ॥[२८] गणिकाध्यक्षः ॥[२९] ना[‡]वध्यक्षः ॥[३०] गोऽध्यक्षः ॥[३१] अश्वाध्यक्षः ॥[३२] हस्त्यध्यक्षः ।][३३] [२ प्र.] रथाध्यक्षः ॥[३४] पत्त्यध्यक्षः ॥[३५] सेनापतिप्रचारः ॥[३६]

---

†–† मूलादर्शस्याद्यं पत्रमनुपलभ्यम् । अत एतद्द्विदण्डान्तर्गतः प्रथमाधिकरणप्रकरणसमुद्देशपरिज्ञापकः समग्रोऽपि सूत्रपाठः मुद्रितपुस्तकादर्शात् समुद्धृतोऽत्र ।

‡ मूलादर्शे यत्र यत्र पत्राणां किञ्चिदूर्ध्वाधोभागास्त्रुटिताः, तेन च ये ये शब्दा वर्णा वा विनष्टा ते सर्वेऽत्र चतुष्कोणकोष्ठकान्तर्गताः मुद्रिताः ज्ञेयाः ।

1 SJG °च्छिद्रविधानम् । 2 svl, G विनिवेशः । 3 s °तृचेय°; svl °तृनिचेय । 4 s आक्ष° । 5 SJG पटले; svl °पाले । 6 svl °गण° । 7 SJG °क्याधि° । 8 SJG कोशप्रवेश्यरत्न° । 9 SJG °शालायां सुवर्णाध्यक्षः । 10 SJG सूत्राध्यक्षः । 11 SJG सीताध्य° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुद्राऽ[ध्यक्षः ॥[३७] विवीताध्यक्षः ॥[३८] समाहर्तृप्रचारः ॥[३९] गृहप]तिक[1]वैदेश[2]-कतापसव्यञ्जनाप्र[3]णिधयः ॥[४०] नागरिक[4]प्रणि [धिः ॥[४१] इति]अध्यक्षप्रचारो द्विती[यमधिकरणम् ॥]

व्यवहारस्थापना ॥[१] विवादपदनिबंधः ॥[२] विवाहसंयुक्तम् ॥[३] दायविभागः ॥[४] वास्तुकम् ॥[५] समयस्यानपाकर्म ॥[६] ऋणादानम् ॥[७] औपनिधिकम् ॥[८] दासकर्मकरकल्पः ॥[९] सम्भूयःसमुत्थापन[5]म् ॥[१०] विक्रीतक्रीतानुशयः ॥[११] दत्तस्यानपाकर्म ॥[१२] अस्वामिविक्रय[6]ः स्वस्वामिसम्बन्धः ॥[१३] साहसम् ॥[१४] वाक्पारुष्यम् ॥[१५] दण्डपारुष्यम् ॥[१६] द्यूतसमाह्वयम् ॥[१७] प्रकीर्णकमिति[7] ॥[१८] धर्मस्थीयं तृतीयमधिकरणम् ॥ छ ॥

कारुकरक्षणम् ॥[१] वैदेहकरक्षणम् ॥[२] उपनिपातप्रतीकारः ॥[३] गू[२ द्वि.]ढाजीविनां रक्षा ॥[४] सिद्धव्यञ्जनैर्माणवक[8]प्रकाशनम् ॥[५] शंकारूपकर्माभिग्रहः ॥[६] आशुमृतकपरीक्षा ॥[७] वाक्यकर्मानुयोगः ॥[८] सर्वाधिकरणरक्षणम् ॥[९] एकांगवधनिक्र(ष्क्र)य[9]ः ॥[१०] शुद्धश्चित्रश्च दंडकल्पः ॥[११] कन्याप्रकर्म ॥[१२] अतिचारदंडा[10] इति ॥[१३] कण्टकशोधनं चतुर्थमधिकरणम् ॥ छ ॥

[†]दंडका[11]र्मिकम् ॥[१] कोशाभिसंह[र]णम् ॥[२] भृ[त्यभरणीयम् ॥[३] अनुजीविवृत्तम् ॥ [12]समयाचारिकम् ॥ राज्यप्रतिसंधानम् ॥ एकैश्वर्यम् ॥ इति योगवृत्तं पञ्चममधिकरणम् ॥[†]]

प्रकृतिसम्पद[13]म् ॥[१] समर्थ[14]ा(व्या?)यामिकम् ॥[२] इति मण्डलयोनिः षष्ठमधिकरणम् ॥ छ ॥

षाड्गुण्यसमुद्देशः ॥[१] क्षयस्थानवृद्धिनिश्चयः ॥[२] संश्रयवृत्तिः ॥[३] समज्या[15]यसां गुणाभिनिवेशः ॥[४] हीनसंधयः ॥[५] विगृह्यासनम् ॥[६] संधायासनम् ॥[७] विगृह्य यानम् ॥[८] संधाय यानम् ॥[९] सम्भूय प्रयाणम् ॥[१०] यातव्यामित्रयोरभिग्रहचिन्ता ॥[११] क्षयलोभविरागहेतवः ॥[१२] प्रकृतीनां सामवायिक[16]विप[रिमर्शः ॥[१३] संहितप्रयाणिकम् ॥[१४] परिपणितापरिप] [३ प्र.] णितापसृताश्च संधयः ॥[१५] संधायप्रयाणकम्[17] ॥[१६] द्वैधीसं[18]भाविकास्संधिविक्रमाः ॥[१७] यातव्य-

† इदं सर्वं पञ्चमाधिकरणं मूलादर्शलिपिकारेण परित्यक्तमतः पश्चात् केनापि विदुषा पत्रस्याधस्तनपार्श्वे सूक्ष्माक्षरेण लिपीकृतमस्ति ।

1 SJ पतिवै°; svl °पतिकः । 2 SJG °देहक° । 3 SJG °नाः प्र° । 4 svl °रीक° । 5 SJG सम्भूय समुत्थानम् । 6 SJG पुस्तकेष्वेतत्पाठः पृथग्विषयज्ञापकत्वेन पठ्यते । 7 SJG °कानि ॥ इति । 8 SJG °णवप्र° । 9 SJG निष्क्रयः । 10 SJG दण्डः । 11 SJG दाण्डक° । 12 svl, JG °सामया° । 13 SJG °पदः । 14 SJG °शमव्या° । 15 SJG °समहीनज्या° । 16 S वायितवि°; svl °वायिक । 17 SJG नास्ति 'सन्धाय प्रयाणकम्' । 18 SJG °धीभावि° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वृत्तिः ॥[१८] अनुग्राह्यमित्रविशेषाः ॥[१९] मित्रहिरण्यभूमिकर्मसंधयः ॥[२०] पार्ष्णिग्राहचिन्ता ॥[२१] हीनशक्तिपूरणम् ॥[२२] बलवता विगृह्योपरोधहेतवः ॥[२३] दण्डोपनतवृत्तम् ॥[२४] दण्डोपनायिवृत्तम् ॥[२५] संधिकर्म ॥[२६] समाधि[1]मोक्षः ॥[२७] मध्यमचरितम् ॥[२८] उदासीनचरितम् ॥[२९] मण्डलचरितम् ॥[३०] इति षाड्गुण्यं सप्तममधिकरणम् ॥ छ ॥

प्रकृतिव्यसनवर्गः ॥[१] राजराज्ययोर्व्यसनचिन्ता ॥[२] पुरुषव्यसनवर्गः ॥[३] पीडनवर्गः ॥[४] स्त[2]म्भवर्गः ॥[५] कोशसंगवर्गः ॥[६] बलव्यसनवर्गः ॥[७] मित्रव्यसनवर्गः ॥[८] इति व्यसनाधिकारिकमष्टममधिकरणम् ॥ छ ॥

शक्तिदेशकालबलाबलज्ञानम् ॥[१] यात्राकालाः ॥[२] बलोपादानकालाः ॥[३] सन्ना[३ द्वि.]हगुणाः ॥[४] प्रतिबलकर्म ॥[५] पश्चात्कोपचिंता ॥[६] बाह्याभ्यंतरप्रकृतिकोपप्रतीकारः ॥[७] क्षयव्ययलाभविपरिमर्शः ॥[८] बाह्याभ्यंतराश्चापदः ॥[९] दूष्यस(श)त्रुसंयुक्ता अर्थानर्थसंशययुक्ताः ॥[१०] तासामुपायविकल्पजाः सिद्धयः इति ॥[११] अभियास्यत्कर्म नवममधिकरणम् ॥ छ ॥

स्कंधावारनिवेशः ॥[१] स्कंधावारप्रयाणम् ॥[२] बलव्यसनावस्कंदकालरक्षणम् ॥[३] कूटयुद्धविकल्पाः ॥[४] स्वसैन्योत्साहनम् ॥[५] स्वबलान्यबलव्यायोगः ॥[६] युद्धभूमयः ॥[७] पत्त्यश्वरथहस्तिकर्माणि ॥[८] पक्षकक्षोरस्यानाम् ॥[९] बलाग्रतो व्यूहभागः ॥[१०] सारफ[3]ल्गु[4]बलविभागः ॥[११] पत्त्यश्वरथहस्तियुद्धानि ॥[१२] दण्डभोगमण्डलासंहतव्यूहव्यूहनम्[5] ॥[१३] तस्य प्रतिव्यूहस्[6]थापनम् ॥[१४] [इति साङ्ग्रामिकं दशममधिकरणम् ॥ १० ॥

भेदो] [४ प्र.] [7]पादानानि ॥[१] उपांशु[8]दण्डाः[9] ॥[२] इति संग[10]वृत्तमेकादशमधि [करणम् ॥ ११ ॥

दूतकर्म ॥[१] मंत्रयुद्धम् ॥[२] सेनामुख्यव]धः ॥[३] मण्डलप्रोत्साहनम् ॥[४] शस्त्राग्निरसप्रणिधयः ॥[५] वीवधासार [प्रसारवधः ॥[६] योगातिसंधानम् ॥[७] दण्डातिसंधानम् ॥][८] एकविजयः ॥[९] इति आबालीयसं द्वादशमधिकरणम् ॥१२॥

उपजापः योगवामनम् ॥[१] अ[11]वसर्पप्रणिधिः ॥[२] पर्युपासनकर्म ॥[३] अवमर्दः[४] ॥ लु(ल)[12]ब्धप्रशमनम् ॥[५] इति दुर्गलम्भोपायस्त्रयोदशमधिकरणम् ॥१३॥

परबल[13]घातप्रयोगः ॥[१] प्रलम्भनम् ॥[२] अद्भुतोत्पादनम् ॥[३] मन्त्रभै[14]षज्यप्रयोगः ॥[४] स्वबलोपघातप्रतीकारः ॥[५] इत्यौपनिषदिकं[15] चतुर्दशमधिकरणम् ॥ १४ ॥

---

1 SJG सन्धिमो°; svl समाधि° । 2 G स्तम्भनव° । 3 S गुल्फ; svl फल्गु । 4 svl 'बल' नास्ति । 5 S संहतव्यूहनम् । 6 svl, G °हसंस्था° । 7 S °पदा° । 8 svl प्रांशुद° । 9 SJG °दण्डः । 10 SJG सङ्घ° । 11 SJG अप° । 12 SJG लब्धप्र° । 13 SJG °बल° नास्ति । 14 SJG 'अद्भुतोत्पादनम् ॥ ३ मन्त्रभेषज्यप्रयोगः ।' सूत्रद्वयं नास्ति । 15 svl, G निषदं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तंत्रायुक्तयः ॥[1] तंत्रयुक्तमिति[2] पञ्चदशमधिकरणम् ॥ १५ ॥

इति शास्त्रसमुद्देशः ॥ [४ द्वि.] पञ्चदशाधिकरणानि ॥[2] सासी(शी)तिप्र[3]करणशतम् ॥[3] सपञ्चाशदध्याय[4]शतम् ॥[4] षट् श्लोकसहस्राणीति ॥[5]

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटल्येन[5] कृतं शास्त्रं विमुक्तग्रंथविस्तरम् ॥

इति [6]विनयाधिकारिके प्रथमेऽधिकरणे[7] [8]प्रथमोऽध्यायः ॥ छ ॥
प्रकरणाधिकरणसमुद्देशः ॥

*

[आन्वीक्षिकीस्थापना ।]

राजवृत्तिः[1] । आन्वीक्षि[9]की[2] त्रयी[3*] वार्ता[4] दण्डनीतिश्चेति[5] विद्याः[6] । त्रयी वार्ता दण्डनीतिश्चेति मानवाः[7] । त्रयीविशेषो[8] ह्यान्वीक्षिकी[ति ।

वा]र्ता दण्डनीतिश्चेति बार्हस्पत्याः । संवरणमात्रं हि [५ प्र.] त्रयी लोकयात्राविद[9] इति । दण्डनीतिरेका विद्येत्यौशनसाः[10] । तस्यां [हि सर्वा] [11]विद्यारम्भाः

[टिप्पनकानि]

१ राजवृत्तिरिति = अयमधिकारः । आत्मसंपद्गुणैराभिगामिकगुणैश्च जनरंजनाद्राजा । तस्य वृत्तिरनुष्ठानं ...... अधिकृतं ... राजवृत्तिरिति प्रधान ... ।

२ प्रत्यक्षपरोक्षाभ्यामीक्षितस्यानु पश्चादीक्षणमन्वीक्षा । तच्चानुमानं तत्प्रयोजनं यस्याः सा आन्वीक्षिकी न्यायविद्या ।

३* अत्रस्था टिप्पनी विनष्टा । एवं अग्रेऽपि यत्र यत्र टिप्पन्य विनष्टा ज्ञातास्तत्र तत्र एतादृशं चिह्नमङ्कितं ज्ञेयम् ।

४ वार्तेति वृत्तिरेव वार्ता । जगद्वृत्तिहेतुत्वात् कृष्यादिका ।

५ दंडनीतिरिति दंडो वधादिकस्तस्य नीतिः प्रणयनं दंडनीतिः ।

६ विद्यते चतुर्विधः पुरुषार्थो ... यकाभिस्ता विद्या राजविद्याः । राजवृत्तिः राजविद्या पाठः ।

७ मनोः शिष्याः ।

८ स्वमते हेतुवचनमिदम् । आन्वीक्षिकी तर्कः स च त्रय्यनुगतो न्यायविद्या... ।

९ लोकव्यवहारविदो राज्ञः ।

१० शुक्रशिष्याः ।

११ सर्वा विद्याः = सर्वे आरंभा मात्स्यन्यायाभावे प्रारंभाणां प्रवर्तनात् ।

---

1 SJG तन्त्रयु° । 2 SJG इति तन्त्रयुक्तिः पञ्च° । 3 svl °तिः । 4 SJG सपञ्चाशदध्यायशतं ॥ साशीतिप्रकरणशतं ॥ 5 SJG मुद्रितपुस्तकेषु 'कौटिल्येन' इति पाठः पठ्यते । 6 SJG इति कौटिलीयेऽर्थशास्त्रे । 7 SJG प्रथमाधिकरणे । 8 SJ राजवृत्तिः प्रथमो°; G प्रथमोऽध्यायः राजवृत्तिः । 9 SJ सर्वत्र 'आन्वीक्षकी' इति पठ्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिबद्धा[1] इति ॥ चतस्र एव[१] विद्या इति कौटल्यः[२]* । ताँभि[3]र्धर्मार्थौ यद्विद्या[४]त्तद्विद्यानां विद्यात्वम् ।

साङ्ख्यं[५] योगो[६] लोकायतं[७] च आन्वीक्षिकी[2] । धर्माधर्मौ[८] त्रय्याम् । अर्थानर्थौ वार्तायाम् । नयाप[3]नयौ दण्डनीत्याम् । बलाबले चैतासां हेतुभि[९]रन्वीक्ष[4]माणा[5] लोकस्योपकरोति । [१०]व्यसनेभ्युदये च बुद्धिमवस्थापयति । प्रज्ञावाक्यक्रियावैशारद्यं च करोति ।

[११]प्रदीपः सर्वविद्यानामुपायः सर्वकर्म[५ द्वि.]णाम् ।
आश्रयः सर्वधर्म्माणां शश्वदान्वीक्षिकी मता ॥

इति[6] विनयाधिकारिके प्रथमेऽधिकरणे द्वितीयोऽध्यायः[7] ॥
इति विद्यासमुद्देशे आ[8]न्वीक्षिकीस्थापना[9] ॥ छ ॥

*

[त्रयीस्थापना ।]

साम[10]ऋक्[१२][१३]यजुर्वेदास्त्रयस्त्रयी । अथर्ववेदेतिहासवेदौ[१४] च वेदाः ।

१ एव शब्दोऽवधारणे । यस्मादभिधानस्वरूपोपकारकफला हि सर्वाभिन्नास्तस्माच्चतस्र एव ।

२ *

३ अभिधानतो भेदं दर्शयन्नाह । ताभिरिति ।

४ विद्यादिति = विचारयेत् । जानीयात् । लभेत । सत्तापादनेन विद्यमानो कुर्यादित्यासां विद्यात्वम् । अनेन भिन्नाभिधानता । विद निवारणे विद ज्ञाने विद्लृ लाभे विद सत्तायामिति धातुचतुष्टयोत्पादनाभिधानत्वात् ।

५ स्वरूपभेदं दर्शयन्नाह सांख्यमिति । पंचविंशतितत्त्वानां संख्यानं संख्या । तामधिकृत्य कृतं सांख्यं ।

६ योगो मोक्षेण सह संयोगकृत् । स च षडंगः ।
प्रत्याहारस्तथा ध्यानं प्राणायामोथ धारणा ।
तर्कश्चैव समाधिश्च षडंगो योग उच्यते ॥
स च न्यायवैशेषिकशास्त्रोक्तः ।

७ लोकायतं बृहस्पतिप्रणीतं नास्तिकशास्त्रम् । तच्च पूर्वपदाविभागेनावस्थितम् ।

८ संवरणमात्रमेव फलं नान्यदिति । तथा च वक्ष्यति । धर्म्मरुचिरुपांशुदंडमयुंजेतेति...

९ युक्तिभिः ।

१० उपकारांतरं दर्शयन्नाह व्यसने इति ।

११ अध्यायप्रांते श्लोकमाह ।

१२ बार्हस्पत्यैराक्षिप्तायास्त्रय्याः स्थापनामाह । स्वरूपतस्तावत् । सामेत्यादि ।

१३ दृष्टादृष्टमर्थं वेदयतीति सहस्रशाखातया सति वैपुल्यात्सामवेदस्य प्रथममुपन्यासः । तदनंतरं पाठसौंदर्यादृग्वेदस्य ।

१४ प्रत्येकं वेदग्रहणमप्रसिद्धस्य वेदत्वस्य ख्यापनार्थम् ।

1 S बन्धा(द्धा); SVL °बद्धा । 2 SJG चेत्यान्वीक्षिकी । 3 S नयानयौ; SVL °नयापन°; JVL नयापनयौ । 4 SVL °क्ष्य° । 5 G °माणान्वीक्षिकीलोक° । 6 G पुस्तके सर्वत्र पुष्पिकायां आदौ 'इति कौटिलीयार्थशास्त्रे' एते शब्दाः मुद्रिता उपलभ्यन्ते । 7 SJ 'प्रथमेऽधिकरणे विद्यासमुद्देशे अन्वीक्षकीस्थापना द्वितीयोऽध्यायः ।' 8 S अन्वी° । 9 J स्थापना नाम । 10 SJG सामर्ग्य° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सि(शि)क्षा[1] कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषं[1] चांगानि। एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः[2]।

स्वधर्मो[3] ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दा[६ प्र.]नं प्रतिग्रहश्चेति। क्षत्रियस्याध्ययनं[5] यजनं दानं शस्त्राजीवो भूतरक्षणं चेति[2]। वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये [3]वणिज्या च। शूद्रस्य[6] द्विजातिशुश्रूषा[7] वार्ता कारुकुशीलवकर्म च।

गृहस्थस्य[8] स्वधर्मा[4]जीवस्तुल्यै[9]रसमानगोत्र[5]र्षिभि[10]र्वैवाह्यं ऋतुगामित्वं [11]देवपित्रतिथिपूजा[6]भृत्येषु त्यागः शेषभोजनं च।

ब्रह्मचारिणः[12] स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतित्व[7]माचार्ये प्राणांतिकी वृत्तिः तदभावे गुरुसुते[8] सब्र[६ द्वि.]ह्मचारिणि वा।

वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः।

परिव्राजकस्य[13] [9]जितेंद्रियत्वमनारम्भो निष्किंचनत्वं संगत्यागो भैक्ष-

१ अत्र 'शिक्षा'शब्दोपरि विस्तृता टिप्पनी लिखिता ज्ञायते। परन्तु पत्रस्य कियत्पार्श्वभागस्य त्रुटितत्वात् केवलं निम्नगताः शब्दा एव पठितुं शक्यन्ते—"सामादीनां प्रयोजनं। अ...कादिकं। इतिहास ...नु... धनुर्वेदआयुर्वेदनाट्यवेद... ।"

२ इत्युपकारदर्शनम्।

३ कः कस्य स्वधर्म इति तत्प्रदर्शयन्नाह। स्वधर्म इत्यादि। धर्मशब्दोऽत्रानुष्ठाने।

४ योगविभागश्च पृथक् प्रयोजनप्रतिपादनार्थम्।

५ क्षत्रियस्यापि स्वानुष्ठानमाह।

६ अनुष्ठानमिति शेषः।

७ त्रयो वर्णा द्विजातय इति।

८ अत्र प्रायः द्वित्रिपंक्तिव्यापका विस्तृता टिप्पनी लिखिताऽनुमीयते परंतु पत्रस्योर्ध्वपार्श्वस्थकियदंशस्य त्रुटितत्वात् केवलं एतद्वाक्यांश एवास्माभिः पठितुं शक्यते—"आश्रमाणां स्वधर्ममाह...... ।"

९ श्रुतवित्तादिना।

१० एकर्षिगोत्राणां च विवाहनिषेधात्।

११ देवशब्दोऽग्निगुरूणामुपलक्षणार्थः पंचयज्ञनिर्वर्तनमेवमभिहितं भवति।

१२ नैष्ठिकमुद्दिश्योच्यते। नोपकुर्वाणकम्।

१३ परिव्रजतीति परिव्राजकः। ग्रामादिष्वेकरात्रं नगरे पंचरात्रमित्यादिक्रमेण।

1 SJG °तिषमिति। 2 SJG 'इति' नास्ति। 3 J वाणि°। 4 SJG स्वकर्मा°। 5 SJG 'गोत्र' नास्ति। 6 SJG 'पूजा' नास्ति। 7 SJG °व्रतत्व°। 8 SJG पुत्रे। 9 SJG संयतेन्द्रि°।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्रतमनेकत्रारण्ये च वासो[2] [1]बाह्याभ्यन्तरं च शौचम्। [2]सर्वेषामहिंसा सत्यं शौचमनसूयाऽऽनृशंस्यं[5] क्षमा च।

स्वधर्मः स्वर्गायानन्त्याय[3] च। तस्यातिक्रमे [4]लोकः संकरादुच्छिद्येत[5]।

तस्मात्स्वधर्मं भूतानां राजा न व्यभिचारयेत्।
स्वधर्मं संदधानो हि प्रेत्य चेह च नंदति॥
व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः। [७प्र.]
त्रय्याभिरक्षितो[6] लोकः प्रसीदति न सीदति॥

इति विनयाधिकारि[के प्रथमेऽधिकरणे तृतीयोऽ]ध्यायः॥ छ॥
विद्यासमुद्देशे त्रयीस्थापना[8]।

*

[वार्तास्थापना दण्डनीतिस्थापना च]

[6]कृषिपाशुपाल्ये[7] [9]वणिज्या[8]* च वार्ता। धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी[10]। तया[10] स्वपक्षं[11] परपक्षं[12] च वशीकरोति[13] कोशदंडाभ्याम्।

आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः। तस्य नीतिर्दण्डनीतिः[14]। अलब्धलाभार्था[15] लब्धपरि[11]रक्षिणी[16]* रक्षितविवर्धनी[17]* वृद्धस्य तीर्थे[12]

१ बाह्यमृज्जलादिभिः। आभ्यन्तरं भावशुद्ध्या सा च सकलसत्त्वहितानुध्यानात्।
२ ...साधारणधर्ममभिधातुमाह।
३ मोक्षाय।
४ चतुर्वर्णाश्रमः।
५ दुर्भिक्षव्याधिमरकादिभिः।
६ ... पायप्रविण ... तं परासरप्रोक्तं शास्त्रमपि कृषिः।
७ शालिहोत्रराजपुत्रपालकाप्यगौतमादिप्रोक्तं शास्त्रम........।
८ *
९ धान्यं कृषिः पशून् पाशुपाल्यं हिरण्यकुप्ये वणिजा विष्टिं त्रितयमपि ददाति।
१० वार्तया।
११ तंत्रम्।
१२ आवापम्।
१३ उपप्रदाननिग्रहादिना।
१४ इदमेव शास्त्रम्।
१५ अलब्धयोर्धर्मार्थयोर्लाभार्थः।
१६ *
१७ *

1 SJG 'व्रत' नास्ति। 2 SG अरण्यवासो; svl °ण्ये वासो। 3 SJ बाह्यमाभ्यन्तरं; svl °ह्याभ्य°। 4 S 'शौच' इति शब्दोऽर्द्धवृत्ताकारकोष्ठके विनिहितः; svl शौचं। 5 SJG °नृशंसं। 6 SJG त्रय्या हि र°। 7 svl तृतीय। 8 SJ विद्यासमुद्देशे त्रयीस्थापना तृतीयोऽध्यायः। 9 J वाणि°। 10 svl °पचारि°। 11 SJG °रक्षणी°। 12 SJG तीर्थेषु।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिपादनी च । तस्यामायत्ता लोकयात्रा । तस्माल्लोकयात्रा[1]विन्नित्यमुद्यतदण्डः स्यात् । न [1]ह्येवंविधं वशोपन [७ द्वि.] यनमस्ति भूतानां यथा दण्ड इत्याचार्याः ॥ नेति कौटल्यः । तीक्ष्णदण्डो हि भूतानामुद्वेजनीयो [2]भवति । मृदुदण्डः परिभूयते । यथार्हदण्डः पूज्यते[3] । सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति । दुष्प्रणीतस्तु[4] कामक्रोधाभ्यामव[5]ज्ञानाद् वानप्रस्थपरिव्राजकानपि कोपयति किमंग पुनर्गृहस्थान् । अप्रणीतस्तु[6] मात्स्यन्यायमुद्भावयति । बलीयानबलं हि ग्रसते दण्डधराभावे । स[7] च[2] तेन गुप्तः प्रभवतीति[3] ॥

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन[4*] पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु [8]वर्त्मसु ॥

[9]इति विनयाधिकारिके चतुर्थोऽध्यायः ॥ विद्यासमुद्देशे
वार्तास्थापना दण्डनीतिस्थापना च [८ प्र.] ॥ छ ॥

॥ विद्यासमुद्देशः समाप्तः ॥

*

[वृद्धसंयोगः]

तस्माद्दण्डमूलास्तिस्रो विद्याः । विनय [मूलो दण्डः प्राणभृतां] योगक्षेमावहः । कृतकः स्वाभाविकश्च[5] विनयः । क्रिया[6] हि द्रव्यं[7] विनयति नाद्रव्यम्[8] । शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या[9] विनयति नेतरम् ।

विद्यानां तु यथास्वम्[10]आचार्यप्रामाण्याद्विनयो[11] नियमश्च[12] ।

१ तस्मात् कस्मादित्याह नह्येवंविधमिति ।
२ लोकः ।
३ वृद्धिं याति ।
४ *
५ पूर्वकृतशुभकर्मणा ।
६ विद्यावृद्धसंयोगलक्षणा ।
७ द्रव्यं सहजविनयसंयुक्तम् ।
८ द्रव्यं विनयतीत्यत्रैव नाद्रव्यं विनयतीति सिद्धे पुनर्वचनं द्रव्याद्रव्यपरिग्रहार्थम् ।
९ विद्याचतुष्टयम् ।
१० यो यस्या विद्याया उचितो.........नियमश्च । यथास्वम् ।
११ प्रत्युत्थानविनयादिः ।
१२ ब्रह्मचर्यैकभक्तादिः ।

1 SJG यात्रार्थीनि° । 2 SJG 'भवति' नास्ति । 3 SJG पूज्यः । 4 SJG 'तु' नास्ति । 5 SJG °मज्ञाना° । 6 SJG °तो हि । 7 SJG 'स च' नास्ति । 8 G वेश्मसु । 9 SJ इति विनयाधिकारिके प्रथमेऽधिकरणे विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च चतुर्थोऽध्यायः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वृत्तचौलकर्मा[१] लिपिं संख्यानं चोपयुञ्जीत ।

वृत्तोपनयन[२]स्त्रयीमान्वीक्षिकीं च सि(शि)ष्टेभ्यः[३] वार्तामध्यक्षेभ्यः[४] । दण्डनीतिं वक्तृप्रयोक्तृभ्यः[५] ।

ब्रह्मचर्यं[६] त्वा[1]षोडशाद्वर्षात् । अतो गोदानम्[७] । दारकर्म चास्य[2] । नित्यश्च विद्यावृद्धसंयोगो विनयवि[3]वृद्ध्यर्थं तन्मूलत्वाद्विनयस्य ।

[८]पूर्वमहर्भा[८ द्वि.]गं हस्त्यश्वरथप्रहरणविद्यासु विनयं[९] गच्छेत् । पश्चिममितिहा[१०]सश्रवणे[4]षु । पुराणमितिवृ[११]त्तमाख्यायिकोदाहरणम्[१२] । धर्मशास्त्रमर्थशास्त्रं चेतिहास[5]ः ।

शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं[१३] च कुर्यात् । [१४]अगृहीताना[6]मभीक्ष्णं[7] श्रवणं च ।

श्रुताद्धि प्रज्ञोपजायते प्र[8]ज्ञया योगो[१५] योगा[9]दात्मवत्तेति विद्या[10]नां सामर्थ्यम् ॥

विद्याविनीतो राजा[१६] हि प्रजानां विनये रतः ।
अनन्यां[१७] पृथिवीं [१८]भुङ्क्ते सर्वभूतहिते रतः ॥ छ ॥

इति विनयाधिकारिके प[11]ञ्चमोऽध्यायः वृद्धसंयोगः ॥

*

१ गर्भपंचमवर्षे वृत्तं चौलकर्म यस्य ।

२ त्र्य्युपयोगार्थं गुरोः समीपे नयनं उपनयनं तच्च ब्राह्मणस्य गर्भाष्टमवर्षे क्षत्रियस्यैकादशवर्षे ।

३ अस्पष्टाक्षरेयं टिप्पनी ।

४ ... पण्याध्यक्षादिभ्यः ।

५ कर्मप्रधानत्वात् वार्तायाः ।

६ विद्याविघ्नप्रतिषेधार्थम् ।

७ मंत्रपूर्वकं समावर्तनाख्यं कर्म । मुंडनमित्यन्ये ।

८ भोजनकालात् प्राक् ।

९ तद्विद्यावृद्धसंयोगात् ।

१० इति एवं ह स्फुटं आस बभूव भुवनकोशादिकम् ।

११ इति राज्ञो वृत्तं नयानयाभ्यां संपत्तिविपत्तिप्रदर्शनार्थं भारतरामायणादि ।

१२ असंभूतकथावाक्यमुक्तप्रत्युत्तरान्वितम् । निदर्शनार्थमन्येषामुदाहरणमिष्यते । यथा तंत्रपंचकादि ।

१३ अभ्यासः ।

१४ मनोधारितानामर्थानाम् ।

१५ आत्मसंपद्गुणैरिति शेषः ।

१६ कुमारस्य भाविराजत्वं द्रष्टव्यम् ।

१७ अन्यनृपतिरहिताम् ।

१८ प्रमाणतः फलतश्च ।

1 SJ चाषोड°; G च आ षोड° । 2 SG च । अस्य । 3 SJG विनयवृद्ध्यर्थम् । 4 SJG °षु° नास्ति । 5 SJG चेतीतिहासः । 6 SJG °नामाभी° । 7 SJG क्ष्यश्रवणं । 8 G प्रज्ञाया । 9 JVl योगादात्मविद्यासामर्थ्यम् । 10 SJG विद्यासाम° । 11 SJ प्रथमेऽधिकरणे वृद्धसंयोगः पञ्चमोऽध्यायः । G प्रथमाधिकरणे पञ्चमोऽध्यायः वृद्धसंयोगः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[अरिषड्वर्गत्यागः ।]

विद्याविनय[१ प्र.]हेतुरिंद्रियजयः[1] कामक्रोधलोभमानमदहर्षत्यागात्कार्यः । कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिंद्रियजयः । शास्त्रानुष्ठानं[2] वा । कृत्स्नं हि शास्त्रमिदमिंद्रियजयः ।

तद्विरुद्धवृत्तिरवश्यें(श्ये)द्रियश्चातुरंतो[2]ऽपि राजा सद्यो विनश्यति । यथा दाण्डक्यो[3] नाम भोजः[4] कामात् ब्राह्मणकन्यकाम[3]भिमन्यमानः सबन्धुराष्ट्रो विननाश । करालश्च वैदेहः[5] । कोपाज्जनमेजयो ब्राह्मणेषु विक्रांतः । तालजङ्घश्च[6] भृगुषु । लोभादैलश्चा[7]तुर्वर्ण्यमत्याहार[१ द्वि.]यमाणः[8] सौवीरश्चाजबिंदुः[9][4] । मानाद्रावणः परदारानप्रयच्छन् दुर्योधनो राज्यादंशं च[10] । मदाद्दम्भोद्भवो[5] भूतावमानी हैहयश्चार्जुनः । हर्षाद्वातापिरगस्त्य[6]मत्यासादयन् वृष्णिसंघश्च द्वैपायनमिति ।

एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः ।
सबंधुराष्ट्रा राजानो विनेशुरजितेंद्रियाः ॥
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेंद्रियः ।
अम्बरीषश्च नाभागो[11] बुभु[१० प्र.]जाते चिरं महीम् ॥

इति विनयाधिकारिके षष्ठो[7]ऽध्यायः ॥ छ ॥ इंद्रियजयेऽरिषड्वर्गत्यागः ॥

*

१ इदंति प्राप्नुवंति प्रभुत्वेन स्वविषयान् ।

२ चतुःसमुद्रांताव ... शापि ।

३ दंडकविषयास्तेषां मुख्याः । बृहदश्वाभिधानः ।

४ भोजान्वयः ।

५ कामादिति शेषः ।

६ कोपात् ।

७ इलायाः इलस्य वाऽपत्यं ऐलः पुरूरवाः ।

८ सर्वस्वमत्याजिहीर्षुः ।

९ सुवीराणां राजा ।

१० अप्रयच्छन्निति शेषः ।

११ नाभागपुत्रः ।

---

1 svl स्पर्शरस । 2 SJG शास्त्रार्थानु° । 3 SJG कन्यामभि° । 4 svl बिन्दुस्सौवीरश्चाजमा° । 5 SJ मदाड्ड°; G मदाद् ड° । 6 SJ °अगस्त्याम° । 7 S इन्द्रियजयेऽरिषड्वर्गत्यागः षष्ठोऽध्यायः; J प्रथमेऽधिकरणे इन्द्रियः°; G प्रथमाधिकरणे षष्ठोऽध्यायः इन्द्रिय° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[इन्द्रियजयः ।]

तस्मादरिषड्वर्गत्यागेनेंद्रियजयं कुर्वीत । वृद्धसंयोगेन प्रज्ञाम् । चारेण चक्षुः[१] । उत्थानेन[२]* योगक्षेमसाधनम् । कार्यानुशासनेन[३] स्वधर्मस्थापनम् । विनयं विद्योपदेशेन । लोकप्रियत्वमर्थसंयोगेन[४]* हितेन [५]वृत्तिः[1] ।

एवं वश्येंद्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत् । [१०द्वि.] [६]स्वप्नं[2] लौल्यम[७]नृतमुद्धतवे[3]षमनर्घ्य[4]संयोग[८]म[5]धर्मसंयुक्तमन[6]र्थसंयुक्तं [९]च व्यवहारम् ।

धर्मार्थाविरोधेन कामं सेव(वे)त न [१०]निःसुखः स्यात् । समं वा त्रिवर्गमन्योन्या[११]नुबद्धं[7] परस्परस्यानुपघातकं[8][१२]* एको ह्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति । [9]अर्थमूलौ हि धर्मकामाविति ।

मर्यादां[१३] स्थापयेत् आचार्यानमात्यान्वा । य एनमपायस्थानेभ्यो वारयेयुः । छाया[10]नालिकाप्रतोदेन वाहनमिव[11] रहसि प्रमाद्यन्तमभितुदेयुः ॥

सहायसाध्यं राजत्वं चक्र[१४]मेकं न वर्तते ।
कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम् ॥

* इति विनयाधिकारिके सप्तमोऽध्यायः ॥ छ ॥ इन्द्रियजयः[12] ॥

*

---

१ चक्षुरिंद्रियकार्यम् ।
२ *
३ वर्णाश्रमाणामनुष्ठानानि तेषां शासनेन शिक्षणेन दंडनेन वा ।
४ *
५ कुर्वीतेति सर्वत्र योज्यते ।
६ निर्दिष्टनिशात्रिभागादन्यत्रालस्यनिरासार्थम् ।
७ द्यूतमृगयास्त्रीपानादिव्यसनकारकैः संयोगं वर्जयेत् ।
८ यत्र क्रोधनः श्रोत्रियो न्यायपराजितोप्यात्महननं करोति ।
९ मायायोगविद्न्यायपराजितोऽपि कोपान्मंत्रतंत्रादिभिरपकरोति ।
१० प्रतिषेधद्वयेनेत्युक्तम् । यदल्पसुखः स्यादिति ।
११ अन्यो द्वावेकं वा स्वोत्पत्त्याऽनुबध्नाति ।
१२ *
१३ तान् मर्यादां कुर्यादित्यन्वयः ।
१४ राज्यचक्रम् ।

---

1 SJG °वृत्तिम् । 2 S स्वप्नलौ° । 3 SJG वेषत्वम° । 4 SJG °मनर्थसं°; Svl °मानर्थ्य° । 5 SJG संयोगं च । अधर्मः । 6 J चानर्थ° । 7 SJG बन्धम् । 8 SJG 'परस्परस्यानुपघातकं' नास्ति । 9 SJG अर्थ एव प्रधानः इति कौटिल्यः । अर्थमूलौ हि धर्मकामाविति । 10 S नाळिका । 11 SJG °देन मा रहसि । 12 S इन्द्रियजये राजर्षीवृत्तं सप्तमोऽध्यायः; J प्रथमेऽधिकरणे इन्द्रियजये°; G प्रथमाधिकरणे सप्तमोऽध्यायः इन्द्रिय° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[अमात्योत्पत्तिः ।]

सहाध्यायिनोऽमात्यान् कुर्वी[त दृष्टशौचसामर्थ्यत्वात् इति भारद्वाजः। ते ह्यस्य विश्वास्याः भवन्तीति ॥

ने][११ प्र.]ति विशालाक्षः । सहक्रीडितत्वात् परिभवन्त्येन[म् । ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत । समानशीलव्यसनत्वा]त् । ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति ॥

साधारणो दोष[2] इति पाराशराः[3] । तेषामपि मर्मज्ञभयात्कृताकृतान्यनुवर्तेत[1] ॥

यावद्भ्यो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः ।
अवशः कर्मणा तेन वश्यो भवति तावताम् ॥

य एनमापत्सु प्राणाबाधयुक्तास्त्वनुगृह्णीयु[2]स्तानमात्यान् कुर्वीत । दृष्टानुरागत्वात् ।

नेति पिशुनः[3]* भक्तिरेषा[4]* न बुद्धिगुणः । संख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युस्तानमात्यान्कुर्वीत । दृष्टगुणत्वात्[5] ॥

नेति कौणपदन्तः[5] । अन्यैरमात्यगुणैरयुक्ता ह्येते । पितृपैतामहानमात्यान् कुर्वीत । दृ[११ द्वि.]ष्टावदानत्वात्[6] । ते[7] ह्येनमपचरन्तमपि[8] न त्यजन्ति । सगंधत्वात्[9] । अमानुषेष्वपि चैतत् दृश्यते गावो ह्यसगंधं गोगणमतिक्रम्य सगंधेष्वेवावतिष्ठन्ते इति ॥

नेति वातव्याधिः । ते ह्यस्य सर्वम[7]वगृह्य[10] स्वामिवत्प्रचरंति[8] । तस्मा-

१ न तत्र दंडप्रणयनं करोति सः ।
२ स्वप्राणदानेन रक्षेयुः ।
३ *
४ *
५ कुणपदंतः शांतनुर्गंगाशापात्पूतिदंतोऽभूत्तस्यापत्यं भीष्मः ।
६ दृष्टं पितृ.........कालेऽवदानमुपधाशुद्धिर्येषाम् । दैङ् शोधनेऽस्य धातो रूपमिदम् ।
७ द्वितीयोपि हेतुः ।
८ वाक्पारुष्यादिभिरुद्वेजयंतमपि ।
९ गंधः परिचयजनितस्नेहः संवासाभ्यासजा प्रीतिः समानो गंधः सगंधः ।
१० सर्वमाक्रम्य प्रभुमात्रमेनं स्थापयित्वा स्वामिवत्प्रचरंति । तदेवं महानत्र दोषः । तथा चोक्तं-

वटवृक्षप्ररोहेव प्रकृतिः स्कंधनाशिनी ।
अमात्याख्यद्वियोगेन भवेन्मूलोपघातिनी ॥

...श्चित्तविकारिणीति वचनात् ।

1 J मर्मज्ञत्वभयात् । 2 SJG एष दोषः । 3 पराशरः । 4 SJG °त्वादिति । 5 SJG °त्वादिति । 6 SJG °प° । 7 J °प° । 8 SJG प्रचरन्तीति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीतिविदो [१]नवानमात्यान्कुर्वीत । नवास्तु यमस्थाने दण्डधरं मन्यमाना भया[1]न्नानपराध्यंतीति ॥

नेति बाहुदन्तीपुत्रः[२] । शास्त्रविद[2]दृष्टकर्मा कर्मसु विषादं गच्छेत् । तस्मा-[3]दभिजनप्रज्ञाशौचशौर्या[१२ प्र.]नुरागयुक्तानमात्यान्कुर्वीत । गुण[३]प्राधान्यात्[4] ॥

[४]*सर्वमुपपन्नमिति कौटिल्यः[5] । [५]कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते । सामर्थ्यतश्च ।

विभज्यामात्यविभवं देशकालौ च कर्म च ।
अमात्याः सर्व एवैते कार्याः स्युर्न [६]तु मन्त्रिणः ॥

इति विनयाधिकारिके अष्टमोऽध्यायः ॥ छ ॥ अमात्योत्पत्तिः[6] ॥

*

[मन्त्रिपुरोहितोत्पत्तिः ।]

जा[७]नपदो[८]ऽभिजातः स्ववग्र[९]हः कृतशिल्पश्चक्षु[१०]ष्मान् प्राज्ञो धा[११]रयिष्णुर्दक्षो[१२] वाग्मी[7] प्रगल्भः प्रति[१३]पत्तिमानुत्साहप्रभा[१४]वयुक्तः क्लेशस[8]हः शुचिर्मैत्रो[१५] [१२ द्वि.]

---

१ क्रमागतान् पूर्वममात्यत्वेऽव्यवहृतान् ।

२ बाहुदंती इंद्रमाता तस्याः पुत्रः ।

३ सर्वेषाममात्यगुणानां मध्य एत एव गुणाः प्रधानभूताः ।

४ *

५ कार्याणि विजिगीषोः समाहर्तृकर्म्मादिनी खनिद्रव्यहस्तिवनकार्योपयुक्तकर्मपर्यवसानान्वेवमष्टादशस्वपि तीर्थेषु मूलामात्या अष्टादश । तेषां कारणिकत्वेन स्थिताः प्रत्येकं त्रयस्त्रय एवमुपयुक्ताश्चतुःपंचाशत्सर्वेपि द्विद्विसप्ततिसंख्याः । तदपेक्षया उच्यते कार्यसामर्थ्यादिति ।

६ अमात्यसंज्ञासामान्यान्मंत्रि...कर्तव्यत्वे प्राप्ते प्राह ।

७ जनपदभवः । राज्ञ इति शेषः ।

८ अभिजात इति । आहारे......योनौ च गर्भे कर्मणि चापि यः ।
शुचिः कृत्स्नगतस्यापि न पापे रमतेऽस्य धीः ॥

९ उत्पथप्रवृत्तं स्वामिनं सुखेनावगृह्णातीति ।

१० शास्त्रचक्षुः ।

११ अविस्मरणशीलः ।

१२ अस्पष्टाक्षरेयं टिप्पनी ।

१३ प्रतिपत्तिः प्रतिभा । अविमर्शेपि यथावदुत्तरं दीयते ।

१४ दैवजनिता प्रभुशक्तिः प्रभावः ।

१५ मित्र इति । मित्रसाधुकारी बहुमित्रो भवति ।

---

1 SJG 'भयात्' नास्ति । 2 S °ददृष्टकर्माकर्मसु; JG °ददृष्टकर्मा कर्मसु । 3 SJG 'तस्मात्' नास्ति । 4 SJG °न्यादिति । 5 इतोऽग्रे G पुस्तके सर्वत्र 'कौटिल्य' स्थाने 'कौटल्य' इति पाठः स्वीकृतो दृश्यते । 6 S अमात्योत्पत्तिः अष्टमोऽध्यायः; J प्रथमेऽभिकरणे अमा°; G प्रथमाधिकरणे अष्टमो° । 7 G वाग्गमी । 8 SVl क्लेशहर ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृढभक्तिः शील[1]बलारोग्यसत्वयुक्तः[2] स्त[१]म्भचापल[२]हीनः[3] संप्रियो[३] वैराणा[४]मकर्ते[५]त्यमात्यसम्पत्[६] ।

अतः पादार्धगुणहीनौ मध्यमावरौ[७] ।

तेषां जनपद[८]मभिजन[4]मवग्रहं[९] चा[१०]प्ततः[5] [११]परीक्ष्येत[6] समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च। कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च। कथायोगेषु वाग्मि[7]त्वं प्राग[१२*]ल्भ्यं प्रतिभानवत्त्वं च । [आपद्युत्साहप्रभावौ क्लेशसहत्वं च[१३]] सं[१४*]व्यवहाराच्छौचं मै[१५*]त्रतां दृढभक्तित्वं च । सं[१६]वासेभ्यः[8] शीलबलारोग्यसत्त्वयोगम्। अस्त[१७*]म्भमचा[१८]पलं[9] च। प्रत्यक्षतः[१९*] संप्रियत्वमवैरत्वं[२०*] च।

[२१]प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः [स्वयंदृष्टं प्रत्यक्षम्, परोपदिष्टं परोक्षम्] कर्मसु [१३ प्र.] कृतेनाकृतावेक्षणमनुमेयम् ।

---

१ स्तंभो मिथ्याभिमानादविनयः ।
२ अस्थिति......ता ।
३ ......सौभाग्ययुक्तः ।
४ स्वामिदोषादुत्पन्नानामपि प्रशमयिता ।
५ बुद्ध्यमात्य ।
६ स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः । दृढता मंत्रगुप्तिश्च मंत्रिसंपत्प्रकीर्तिताः ॥
७ मंत्रिणाविति शेषः ।
८ जन्मभूमिम् ।
९ ज्ञातिवर्गम् । अंतरंगत्वात् ।
१० उभयाप्तात् ।
११ परिसमन्तात् बहुभ्य इक्षेत ।
१२ *
१३ इदं सूत्रं मूलादर्शलिपिकारेण परित्यक्तं ततः पश्चात् केनापि विदुषा पृष्ठस्याधोभागे लिपीकृतम् ।
१४ *
१५ *
१६ अथ कथमाप्तात्समानविद्येभ्यः संवासेभ्यः परोपदेशाद्गुणाः परीक्ष्याः यथा कर्मारंभेषु कथायोगेष्वापदि संव्यवहाराच्च लिंगा .... ।
१७ *
१८ स्थैर्यम् ।
१९ *
२० *
२१ परी ...... ति सर्वत्र संबंधः ।

---

1 svl भक्तिशील । 2 SJG संयुक्तः । 3 SJG चापल्यवर्जितः । 4 SJG 'अभिजन' नास्ति । 5 s चाप्य[प्त]तः svl; G चाप्यतः । 6 SJG °क्षेत । 7 G °वाग्मि° । 8 SJG °सिभ्यः । 9 SJG °चापल्यं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]यौगपद्यात्तु कर्मणामनेकत्वादनेकस्थ [त्वाच्च देशकाला]त्ययो मा भूदिति परोक्षममात्यैः कारयेदित्यमात्यकर्म।

पुरोहितमुदितोदितकुल[१*]शीलं सांगे[2] वेदे दैवे निमित्ते दण्डनीत्यां चाभिविनीतमापदां दैवमानुषीणां [२]अथर्वभिरु[३]पायैश्च प्रतिकर्तारं कुर्वीत। तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानु[४]वर्तेत।

ब्राह्मणे[५]नैधितं क्षत्रं[६] मन्त्रिमंत्राभिमंत्रितम्।
जयत्यजितम[७]त्यंतं शास्त्रानु[3]गम[८*]शस्त्रितम्॥

इति विनयाधिकारिके नवमोऽध्यायः॥ छ॥ मन्त्रिपुरोहितोत्पत्तिः॥

*

[उपधाभिश्शौचाशौचज्ञानममात्यानाम्।]

मंत्रिपुरोहित[९]सखः[4] सामा[१३ द्वि.]न्येष्वधिकरणेषु स्थापयित्वा आमात्यानुपधाभिः[१०] शोधयेत्[5]।

पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृ[११]ष्यमाणं राजा[१२*]वक्षिपेत्। स[१३]सत्रिभिः श[6]पथ[१४]पूर्वमेकैकममात्यमुपजापयेत्। अ[१५*]धार्मिकोऽयं राजा साधुधा-

१ *
२ अथर्वविहितप्रतिविधानैः।
३ दंडनीत्याभिहितैः सामादिभिः।
४ अनेन परस्परानुकूलता दर्शिता।
५ पुरोहितेन। ब्राह्मणवचनं च ब्राह्मणानुष्ठानतत्परताख्यापनार्थं तेन वृद्धिं नीता।
६ 'कर्तृ' इति शब्दस्योपरि लिपीकृतम्। अपरा टिप्पणी पृष्ठस्याधोभागे लिखिता। यथा—
'क्षत्रेण ब्रह्मसंपृष्टं क्षत्रं च ब्रह्मणा सह। उदीर्णे दहतः शत्रून् वनानीवाग्निमारुतौ॥'
७ कर्म।
८ *
९ मंत्रिपुरोहितादिसख इति द्रष्टव्यम्। सेनापतियुवराजयोरप्यत्रोपयोगदर्शनात्। लोहकारोपकरणन्यायेन पुराणैर्मंत्र्यादिभिरभिनवाः परीक्ष्यन्ते।
१० त्रिवर्गभयालंबनाभिरुपजापोक्तिभिः।
११ असहनतया प्रतिपद्यमानम्। स्वामिसंकेतादेव परीक्ष्याणां परीक्षार्थम्।
१२ *
१३ सपुरोहितो बहिरवस्थितः।
१४ पूर्वमेव शपथानमात्यं कारयित्वा यश्च .... सः स्थितस्त्वं स्थित एवानभिमतेपि न मंत्रभेदः कर्तव्यः।
१५ *

1 SJ अयौग°; SVL यौगं। 2 SJG षडङ्गे। 3 SVL; J; JVL °नुगत। 4 SVL 'सखः' नास्ति। 5 SG शौचयेत्। 6 SVL शापथ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सिं[१]कमन्यमस्य तत्[२]कुलीनम[1]परुद्धं कुल्य[३]मेक[४]प्रग्रहं सामन्तमाटविकमौपपादुकं[2][५] वा प्रति[६]पादयामः। सर्वे[७]षामेतद्रोचते कथं वा तवेति[८*]। प्रत्याख्याने[९] शुचिरिति धर्मोपधा।

सेनापतिरसं[१०*]प्रग्रहे[3]णावक्षिप्तः [4]ससत्त्रिभिः [5]शपथपूर्वमेकैकममात्यमुपजापयेल्लो[११]भनीयेनार्थेन[6] राजविना[7]शाय सर्वेषामेतद्रोचते कथं वा तवेति। प्रत्याख्याने शुचिरित्यर्थोपधा।

[१२]परिव्राजिका लब्धविश्वासा[१३]ऽन्तःपुरे कृतसत्कारा [महामात्र[१४]मेकैकमुपजपेत्] [१४ प्र.] राजमहिषी त्वां कामयते कृतसमागमोपा[या महानर्थश्च भविष्यतीति[8]। प्रत्याख्याने शुचिरिति] कामोपधा।

प्रहवणं[9]निमित्तमेकोऽमा[१५*]त्यः सर्वानमात्यानावाहयेत्। [१६*]तेनोद्वेगेन राजा तानवरुन्ध्यात्। कापटिकश्छात्रः पूर्वा[१७]वरुद्धस्तेषामर्थमानावक्षिप्तमेकैकममात्यमुपजपेत्। असत्प्रवृत्तोऽयं राजा साध्वेनं[10] हत्वा अन्यं प्रतिपादयामः[11]। सर्वेषामेतद्रोचते कथं वा तवेति। प्रत्याख्याने शुचिरिति भयोपधा।

१ कर्मधारयोऽत्र अथवा साध्विति क्रियाविशेषणम्।
२ कस्यचिदन्योऽभिमत इत्याह तत्कुलीनम्। तस्य राज्ञो भ्रातरं पुत्रं वा।
३ सोपि कृतार्थः सन् पित्रारिवैरमनुसरिष्यतीत्याशंकयाह कुल्यं-कुलं च व्यवहितम्।
४ राज्ञा समानचिन्हं मानार्हम्।
५ उत्पाद्यं यो राजा न भवत्यथ च राजयुक्तश्चंद्रगुप्तसमः।
६ राज्ये इति वाक्यशेषः।
७ .... स्यादित्याशंकायां सर्वेषामिति महापुरुषाणाम्।
८ *
९ प्रष्टो विमृशति नायमनुजीविनां ....।
१० *
११ यस्य यस्य यस्मिन्नर्थे लोभोऽस्ति।
१२ परिव्रजनशीलव्रता।
१३ परीक्ष्येषु।
१४ 'महामात्रमेकैकमुपजपेत्' एतद्वाक्यमादर्शे नोपलभ्यते किन्तु 'महामात्र'शब्दस्योपरि एतादृशी टिप्पनी लभ्यते—'मात्रा शब्देन विभूतिः। सा महती एषाम्।'
१५ *
१६ *
१७ संकेतादेव।

1 SJG °व°। 2 SJG °पादुकं। 3 svl; J प्रतिग्रहे। 4 SJG 'स' नास्ति। 5 SJG 'शपथपूर्वं' नास्ति। 6 svl °नार्थेन लोभयेद्राजवि°। 7 S विनाशनाय। 8 J ते भविष्यतीति। 9 SJG प्रवहण। 10 J सहसैनं हत्वा। 11 SG °पादयिष्यामः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु[१*] कर्मसु[1] स्थापयेत् ।
अर्थोपधाशुद्धान् समाहर्तृ[२*]सन्निधातृनिचयकर्मसु ।
कामोपधाशुद्धान् बाह्या[३]भ्यन्तर[४]विहाररक्षासु[५] ।
भयोपधाशुद्धानासन्न[६]कार्येषु राज्ञः ।
सर्वोपधाशुद्धान् मन्त्रिणः[७*] कुर्यात् ।
सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषू[८*]पयो [१४द्वि.]जयेत्[९*] ।

त्रि[१०]वर्गभयसंशुद्धानमात्यान् स्वेषु कर्मसु ।
अधिकुर्याद्यथाशौचमित्याचार्या व्यवस्थिताः[११] ॥
न त्वेव कुर्यादात्मानं देवीं वा [2]लक्ष्यमीश्वरः ।
शौचहेतोरमात्यानामेतत्कौटल्यदर्शनम् ॥
न दूषणम[१२]दुष्टस्य विषेणेवाम्भसश्चरेत् ।
[१३]कदाचिद्धि प्रदुष्टस्य नाधिगम्येत भेषजम् ॥
कृता च कलुषा बुद्धि[१४*]रुपधाभिश्चतुर्विधा ।
नागत्वा[3]ऽन्तर्निवर्तेत स्थिता सत्त्ववतां धृतौ ॥
तस्माद्[१५]बाह्यमधि[१६]ष्ठानं कृत्वा कार्ये[4] च[१७]तुर्विधे ।
शौचाशौचममात्यानां राजा मार्गेत[१८*] सत्त्रिभिः ॥

इति विनयाधिकारि [१५प्र.] के दशमोऽध्यायः ॥ छ ॥ उपधाभिश्शौचाशौचज्ञानममात्यानाम् ॥ छ ॥

*

---

१ *
२ *
३ उद्यानादि । ४ अंतःपुरादि ।
५ ...... पालनेषु ।
६ आसन्नेषु च कार्येषु निर्भयत्वात् । जनपदोत्पन्नात्.............. ।
७ *
८ *
९ *
१० आचार्यमतमुपसंहरन्नाह । ११ न वयमिति वाक्यशेषः ।
१२ अमात्यहृदयस्य । १३ कुलिकवेलोपयुक्तात् ।
१४ *
१५ कौटल्यः स्वमतमाह ।
१६ राजस्थाने दूष्यामात्यं लक्ष्यं कृत्वा राजमहिषीस्थाने दूष्यपत्नीं च दूष्यार्थादिकं चाधिष्ठानम् ।
१७ त्रिवर्गभयभयशुद्धिपरीक्षालक्षणे ।
१८ *

---

1 SJG 'कर्मसु' नास्ति । 2 S लक्ष्मी°; JG लक्ष्मी° । 3 G नागत्वान्तं । 4 G चार्ये ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[संस्थोत्पत्तिः ।]

उपधाभिः शुद्धामात्यवर्गो[1] गूढपुरुषानुत्पादयेत् ।

कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनान् संत्रितीक्ष्णरसदभिक्षुकीश्च ।

परमर्मज्ञः[2] प्रगल्भः[3*] छात्रः[4] कापटिकः[5] तमर्थमानाभ्यां प्रो[1]त्साह्य मंत्री ब्रूयात् । राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यसि तत्तदानीमेव प्रत्यादिशेति ।

प्रव्रज्याया[2]ः प्रत्यवसित[3]ः प्रज्ञा[6]शौचयुक्त उ[7]दास्थितः । स[8] वार्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्या[9]न्तेवासी कर्म[10] का[१५ द्वि.]रयेत् । कर्मफ[11]लाच्च सर्वप्र[12]व्रजितानां ग्रासाच्छादनावसथान् [13]प्रतिविदध्यात् । वृत्ति[14]कामांश्चोपजपेत् । एतेनैव[15] वेषेण[4] राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति । सर्वप्रव्रजिता[16]श्च स्वं स्वं वर्गमेव[5]मुपजपेयुः ।

कर्षको वृत्तिक्षीणः[17] प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः । स कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण[18] ।

---

१ तेषां लक्षणमभिधातुमाह ।
२ परेषां आत्मनोऽन्येषां मर्माणीव नर्माणि यदुद्धटना तन्मर्मणि विद्ध इव व्यथते तानि जानातीति ।
३ *
४ छात्र इव कपलिकामात्रपरिच्छदः ।
५ कपटेन चरति कापटिकः ।
६ प्रज्ञाशौचयुक्त इत्यपि द्रष्टव्यम् । काकाक्षिगोलकन्याय ...... ।
७ उदित्युत्कर्षवाचित्वान्मोक्ष एव । तस्मादास्थितः प्रतिनिवृत्तः ।
८ वृत्तिकामत्वात् ।
९ तत्कर्मानुरूपराजार्पितहिरण्यः प्रभूतशिष्यश्च ।
१० कृषिपाशुपाल्यवणिज्यालक्षणम् ।
११ मूलराशेरधिकात् ।
१२ शाक्याजीवपाशुपतादीनाम् ।
१३ प्रत्येकम् ।
१४ प्रव्रज्याप्रत्यवसितत्वाद्ये वृत्तिकामास्तानुपलक्ष्य उपजपेत् ।
१५ उपजापप्रकारमाह ।
१६ उदास्थितवत् ।
१७ दैवात्क्षीणबीजबलीवर्दादिः ।
१८ कर्मफलाच्च सर्वेत्यादि द्रष्टव्यम् ।

---

1 SJG उत्साह्य । 2 SJG प्रव्रज्याप्रत्य° । 3 SVl प्रव्रज्यप्रत्यवमतः; GVl प्रत्यपसृतः । 4 S दोषेण; SVl वेषेण । 5 SJG 'एव' नास्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाणिजको[1] वृत्तिक्षीणः [१९ प्र.] प्रज्ञाशौचयुक्तो [1]वैदेहकव्यञ्जनः[2]। स वणिक्कर्मप्रदिष्टायां भूमाविति समानं पूर्वेण[3]।

मुण्डो[4] जटिलो[5] वा वृत्तिकामस्तापसव्यञ्जनः । स नगराभ्यासे(शे) प्रभूतजटि[2]लैरन्तेवासी शाकं यवमुष्टिं[3] वा मासद्विमासान्तरं प्रकाशमश्नीयात् गूढमिष्टमाहारम्। [4]वैदेहि(ह)कान्तेवासिनश्चैनं समिद्धयोगैरर्चयेयुः । शिष्याश्चा[5]स्यावेदयेयुरसौ सिद्धस्सामेधिक[7] इति । समे[8] [१९ द्वि.]धाशास्तिभिश्चाभिगतानामङ्गविद्यया[11] शिष्यसंज्ञाभिश्च[12] कर्माण्यभिजनेऽवसितानि[13] प्रत्यादिशेत्[14] अल्पलाभमग्निदाहं[15][16] [7]चौरभयं[16] दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानं 'इदमद्य श्वो वा भविष्यति इदं वा राजा करिष्यति'[9] । तदस्य गूढाः सत्त्रिणः[10] संपादयेयुः[11]।

१ वणिगेव वाणिजकः ।

२ विदेहराजशास्त्रानुष्ठानाद्वैदेहकव्यंजनः ।

३ शेषं गृहपतिसमानम् ।

४ शाक्याजीवादिः ।

५ पाशुपतादिः ।

६ जटिलग्रहणं मुंडादीनामप्युपलक्षणार्थम् । यदि शाक्यः क्षपणको वा तापसव्यंजनस्तदा तच्छिष्या मुंडा अपि भवंति ।

७ सिद्धतापसव्यंजनस्य ।

८ समेधायै वृद्धये प्रभवति ।

९ समेधनं समेधः ।

१० अर्थिनाम् । प्रसिद्धिवशात् ।

११ यया प्रष्टुः प्रश्नसमये अंगस्पर्शं दृष्ट्वा आदेशः क्रियते ।

१२ संकेतितस्वांगविकारैः ।

१३ जातेरनुरूपाणि ।

१४ प्रतिपुरुषम् ।

१५ मंत्री ते वस्त्रयुगं दास्यतीति ।

१६ चौरभयं अग्निदाहं च दूष्यगृहेष्वेव ।

१७ राज्ञः सकाशादस्य मृत्युरिति ।

१८ उदन्तः । शिक्षितपारापतगलबद्धपत्रकाद्विदित्वा ।

१९ आदिशेदिति संबंधः ।

1 SVl वैदेहिक । 2 SJG मुण्डजटिल; SVl मुण्डनको । 3 SJ यवससुष्टिं; G यवसमुष्टिं । 4 SJG °वैदेहका° । 5 J शस्तिभिः । 6 SJG °जनेऽवसितान्यादिशेद° । 7 SJG चोर° । 8 SJGVl तुष्टदानं । 9 SJG °करिष्यतीति । 10 SJG सत्रिणश्च । 11 SG संवाद° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां [1]राज्यभाग्य[2]मनुव्याहरेत्[3]। मन्त्रिसंयोगं च ब्रूयात्[4]।

मन्त्री[2] चैषां वृत्तिकर्मभ्यां वियतेत[3]। ये च राज्ञः[5] कारण[6]क्रुद्धास्तानर्थमानाभ्यां [१७प्र.] शमयेत्। अकारणक्रुद्धांस्तूष्णींदण्डेन राजद्विष्ट[4]कारिणश्च।

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम्।
जानीयुः शौचमित्येताः[5] पञ्च संस्थाः[6] प्रकीर्तिताः॥

इति विनयाधिकारिके एकादशोऽध्यायः॥छ॥ गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः॥छ॥

*

[गूढपुरुषप्रणिधिः।]

ये[7] चाप्य[7]सम्बन्धिनो[8]ऽवश्य[9]कर्तव्यास्ते लक्षण[10]मङ्गविद्यां[11] जम्भक[12]विद्यां[9] मायागत[13]माश्रम[14]धर्म[9]निमित्त[15]मन्तरचक्र[16]मित्य[17]धीयाना[18]ः सत्रिण[19]ः [20]संसर्गविद्यां[10] वा।

---

१ अस्य राज्ञः सकाशात्तव भाग्यं लक्ष्मीर्भविष्यतीति। [रा]ज्ञो वा भाग्यं सकलचक्रवर्तित्वम्। अनेन सत्पुरुषसंग्रहः स्यात्।
२ संकेतितः।
३ एवं च सर्वज्ञत्वे सिद्धे सर्वेऽपि वृत्त्यर्थिनः स्वामयं प्रकाशयंति। क्रुद्धास्तुष्टाश्च ज्ञायंते। तेषां प्रतिविधेयमाह।
४ अभिचारादिविधायिनः।
५ इति प्रकारे। एता उद्दिष्टा वक्ष्यमाणाश्च व्रजवास्यादयः। पंचतां तु न व्यभिचरंति। व्रजवास्याटविकादीनां गृहपतिकव्यंजनेऽन्तर्भावः। श्रवणस्य वा तापसव्यंजने।
६ सर्वगैकस्मिन् स्थाने स्थिताः।
७ संचारोत्पत्तिरभिधीयते।
८ आप्यानां मंत्रिपुरोहितोपाध्यायादीनां संबंधिनः।
९ अवश्यभर्तव्याः।
१० .... लक्षणादि ....परिचयकारकम्।
११ पूर्वोक्तां शुभाशुभज्ञानफलाम्।
१२ *
१३ *
१४ *
१५ भौमान्तरीक्षविकारैः शुभाशुभसूचकम्।
१६ *
१७ *
१८ *
१९ सत्रिणो विद्यमानमपि त्रायति गोपायतीति सत्रं छद्म तद्विद्यते येषां ते सत्रिणः।
२० संसृज्यन्ते जना यस्यां सा संसर्गविद्या गीतनृत्यादिका ताम्.......।

---

1 SJG राज°। 2 SJG भाव्य°। 3 SVl °व्याहरेत। 4 SJG 'ब्रूयात्' नास्ति। 5 SJG 'राज्ञः' नास्ति। 6 SJG कारणादभिक्रुद्धाः। 7 G चाय्यसम्बन्धिनो°। 8 SJG भर्तव्या°। 9 S धर्मं; SVl धर्मं। 10 SJG °विद्या।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ये जनपदे शूरा[१]स्त्यक्तात्मानो[२] हस्तिनं व्यालं वा [१७द्वि.] पुरुषमनुष्यादिकं वा[1] द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः।

ये बन्धुषु निःस्नेहाः क्रूरा अलसा[2]श्च[३] ते रसदाः।

परिव्राजिका[४] वृत्तिकामा[५] दरिद्रा विधवा[६] प्रगल्भा[७] ब्राह्मण्यन्तःपुरे[८] कृतसत्कारा महामात्र[९]कुलान्यधिगच्छेत्[१०]।

एतया मुण्डा[११] वृषल्यो व्याख्याताः[१२]। [१३]इति सञ्चाराः।

तान् राजा स्वविषये मन्त्रिपुरोहितसेना[3]धिपतियुवराजदौवारिकान्तर्वंशि[१४]कप्रशास्तृ[१५*]समाहर्तृ[१६]सन्निधातृ[१७]प्रदेष्टृ[१८]नायक[१९*]पौरव्यावहारिक[२०]कार्मान्तिक[4][२१]मन्त्रिपर्षद्[5]ध्यक्षदण्डदुर्गान्तपालाटविकेषु श्रद्धेय[२२]देशवेषशिल्पभाषाभिजनापदेशात्[6] भक्तितः[२३*]सामर्थ्ययोगा[२४]च्चापसर्पयेत्।

१ निर्भयाः। २ ......अगणितजीविताः।
३ यद्युद्योगिनो भवंति तदा रसदत्वं नांगीकुर्वन्तीति।
४ परिव्राजकलिंगधारिणी सर्वत्र परिव्रजतीति।
५ वृत्तिकामत्वाद्राजकार्यकारिणी।
६ स्वतंत्रा।
७ जितसभा।
८ पूज्यत्वादंतःपुरे राजानुमत्या कृतसत्कारा।
९ ऋद्धिमदमात्यगृहाणि।
१० चारसंचारार्थम्।
११ अर्हतबुद्धभिक्षुक्यः।
१२ वेश्यामातरो देवतालिंगधारिण्यो व्याख्याता इति। वृत्तिकामाऽन्तःपुरे कृतसत्कारा महामात्यकुलानि गच्छेदिति योज्यम्।
१३ इत्येवंप्रकाराः सत्र्यादयः कुब्जादयश्च संचाराः। संचरंति संचारयंति चारमिति।
१४ अंतःपुरे नियुक्तः।
१५ *
१६ समाहर्ता कोशसम ....।
१७ गृहामात्यः।
१८ प्रदेष्टा कंटकशोधनाधिकृतः।
१९ *
२० पुरव्यवहारे नियुक्तः।
२१ ये केचन खनिद्रव्यहस्तिवनादीनां कर्मान्ताः तेषु नियुक्तः।
२२ श्रद्धेयो यस्य यो देशः यस्य यो वेषः इत्याद्यपदेशात्।
२३ *
२४ गूढपुरुषप्रणिधानं चामात्यादीषु वृत्तांतपरिज्ञानार्थं .... च निश्चित्य शस्त्ररसप्रयोगार्थम्।

1 SJG 'पुरुषमनुष्यादिकं वा' नास्ति। 2 SJG °श्चालसा। 3 SJG सेनापति। 4 J कार्तान्तिक°। 5 SJG परिषद्। 6 SJG °देशान्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेषां बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहनोपग्राहिणः तीक्ष्णा[१*] विद्युस्तं सत्रिणः संस्थास्वर्पयेयुः ।

[सूदाराळिकस्नापकसंवाहकास्तरककल्पकप्र]साधकोदकपरिचारका[१८ प्र.] रसदाः कुब्जवामनकिरात[२]मूकबधिरान्धजड[1] [च्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशी]लवाः स्त्रियश्चाभ्यन्तरं चारं[३*] विद्युस्तं भिक्षुक्यः संस्थास्ववसर्पयेयुः[2] । संस्थानां कापटिकादीनां[3]मंतेवासिनः संज्ञा[४*]लिपि[५*]भिश्चारसञ्चारं कुर्युः[६*] । न चान्योन्यं संस्थास्ते[७] वा विद्युः । भिक्षुकीप्रतिषेधे द्वाःस्थपरम्परामाता[८]पितृव्यञ्जनाः शिल्प[९]कारिकाः कुशीलवा[१०] दास्यो वा गीतवाद्य-पाट्य[4]भाण्ड[११]गूढलेख्यसंज्ञाभिर्वा बाह्यानां[5] चारं निर्हरेयुः[6] । दीर्घरोगो[१२*]न्माद[१३]ाग्निरसविसर्गेण वा गूढनिर्गमनम्[१४*] । त्रयाणा[7][१५]मेकवाक्ये सम्प्रत्यय इति[8] । तेषामभीक्ष्णविनिपाते तूष्णीं[9]दण्डः[१६] प्रतिषेधः[10] । कण्टक[१७]शोधन[१८]नोक्ताश्चा[11]वसर्पाः परेषु[१९] कृतवेतना वसेयुः । सम्पातनिश्चा[12][२०]रार्थं त उभयवेतनाः ।

१ *

२ म्लेच्छजातिबर्बरशिराः ।

३ *

४ *

५ *

६ *

७ संस्थाः संस्थान्तरचारसंचाराः चारसंचारान्तरं च ।

८ मातापितृवत् व्यज्यंतीति भृत्या एवापत्यस्नेहं किल दर्शयंतः ।

९ तत्प्रतिषेधे स्त्री ....

१० तत् प्रतिषेधे इति शेषः ।

११ तूर्यभांडांतरनिहितगूढलेख्यैः ।

१२ *

१३ अनभिलक्षितशिरोवेदनादिः ।

१४ *

१५ टिप्पनीयमस्पष्टाक्षरा ।

१६ *

१७ *

१८ *

१९ अरिमित्रादिषु ।

२० अस्पष्टाक्षरा ।

1 SJG °जडान्ध। 2 SJG °स्त्वर्पयेयुः । 3 SJG 'कापटिकादीनां' नास्ति । 4 S 'पाट्यः' नास्ति; SVl JG गीतपाठ्यवाद्य° । 5 SJG 'बाह्यानां' नास्ति । 6 J निर्हारयेयुः । 7 SVl त्रयाणामन्योन्यमेक° । 8 SJG 'इति' नास्ति । 9 G तूष्णीदण्डः । 10 SJG प्रतिषेधो वा । 11 SJG °श्चापसर्पाः । 12 S °तश्चोरार्थं; SVl °तनिश्चारार्थं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान्[2] ।
तांश्चारि [१८ द्वि.] प्रहितान् विद्यात्तेषां[3] शौचं च तद्विधैः[4] ॥
[5]एवं शत्रौ च मित्रे[6] च मध्यमे चावपेच्चरान् ।
उदासीने च तेषां च तीर्थेष्वष्टादश[7]स्वपि ॥
अन्तर्[1]गृहगतास्तेषां[8] कुब्जवामनपंडकाः[2] ।
शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः ॥
दुर्गेषु[9] वणिजः संस्था दुर्गान्ते सिद्धतापसाः ।
कर्षकोदास्थितौ[3] राष्ट्रे राष्ट्रान्ते व्रजवासिनः ॥
वने वनेचराः[10][4] कार्याः श्रवणा[5][11]टविकादयः ।
परप्रवृत्तिज्ञानार्थाः [12]शीघ्राश्चारपरम्पराः ॥
परस्य चैते[6] बोद्धव्याः तादृशैरेव तादृशाः ।
चारसञ्चारिणः संस्था गूढाश्चा[13]गूढसंज्ञकाः[14][7] ॥
[15]अकृत्यान् [१९ प्र.] कृत्यपक्षीयैः [16]दर्शितान् कार्यहेतुभिः ।

१ अस्पष्टाक्षरा । २ उभयवेतनान् ।

३ उक्तं च –
मत्स्यस्येव गतिं मत्स्याश्चाहेरिव पदान्यहिः । स्वचेष्टितैर्विजानन्ति धूर्ताधूर्तविचेष्टितम् ॥

४ उभयवेतनैः स्वकीयैः ।

५ अरिविषये गूढपुरुषप्रणिधानं दर्शयन्नाह ।

६ शत्रौ च शब्दात् शत्रुमित्रे तन्मित्रे मित्रे च स्वकीये समुच्चयात् तन्मित्रेषु च मध्यमे उदासीने समुच्चयात् तन्मित्रेषु च निक्षिपेत् चरान् ।

७ उक्तेन न्यायेन मंत्र्यादिषु तीर्थेष्वष्टादशसु च । तेषां पूर्वोक्तानाम् एवं द्वादश .... विजिगीषुं विहायैकदेशराजानः प्रत्येकं तेषां मंत्र्यादितीर्थान्यष्टादशैव गूढप्रणिधानस्थानानां द्वेशते सप्तविंशत्यधिके । एषु स्थानेषु ।

८ स्थानवशात् चरावापमाह ।

९ संचारप्रणिधानमुक्त्वा संस्थाप्रणिधानमाह । दुर्गेषु वणिजः संस्था इत्यादि ।

१० वनेचरा गृहपतिक .... भेदात् श्रवणा इति मुंडतापसबौद्धजैनाः । आटविकादयो गृहपति...... ।

१२ टिप्पनीयमस्पष्टाक्षरा ।

१३ *

१४ ......तपस्वि......गृहपतिकसंज्ञिताः ।

१५ परस्य शत्रोर्बोद्धुं न शक्यते । उक्तं च –
कः समानाभिहारेण .... नान् । भृत्यराशौ स्थितान्वेत्ति शंखे क्षीरकणानिव ॥
तत् परिज्ञानार्थं उपायान्तरमाह । अकृत्यानित्यादि ।

१६ क्रोधलोभभयमानैः कारणभूतैः प्रनिरूपितान् । तद्यथा मंत्री सेनापत्यादीकान् कृतककृत्यान् कृत्वा मानाधिकारभ्रष्टान् राष्ट्रान्निर्वासयेत् । तेषु च परावसर्पा विश्वसन्ति । ततश्च ते विजिगीषोः सूचयन्त्येवं परावसर्पज्ञानार्थे मुख्यानन्ते वासयेदिति ।

1 SJG °गृहचरास्तेषां । 2 SG षण्डकाः; J वञ्चकाः । 3 SJG °स्थिता । 4 S वनचरैः; SVl वनचराः । 5 SJG श्रमणा° । 6 S चैके; SVl चैते । 7 SJG संज्ञिताः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परा[1]वसर्पज्ञानार्थं मुख्यानन्तेषु वासयेत् ॥

॥ इति विनयाधिकारिके द्वादशोध्यायः ॥ छ ॥ गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः गूढपुरुषप्रणिधिः ॥ छ ॥[2]

*

[कृत्याकृत्यपक्षरक्षणम् ।]

कृ[3]तमहामात्रा[4]वसर्पः[5] पौरजानपदानवसर्पयेत्[6]। [१]सत्त्रिणो द्वन्द्विन[२]स्तीर्थ[7]सभा[३]-पूग[४]जन[५]समवायेषु विवादं कुर्युः[६]। [७]सर्वगुणसम्पन्नश्चायं राजा श्रूयते। न चास्य कश्चित् गुणो दृश्यते यः। पौरजानपदान् अतिमात्रं[8] दण्डकराभ्यां पीडयति[9]। तत्र [८]येऽनुप्रशंसेयुः[९] तान[१०]नित[११]रस्तं[१२] च प्रतिषेधयेत्। मात्स्यन्यायाभिभूताः [१९ द्वि.] प्रजा मनुं वैवस्वतं राजानं चक्रिरे[10]। धान्यषड्भागं [१३]पण्यदशभागं हिर[१४]ण्यं चास्मै[11] [१५]भागधेयं प्रकल्पयामासुः[१६]। तेन भृ[१७]ता राजानः प्रजानां

१ कृतलक्षणाः। कृता महामात्रेषु महर्द्धिषु सतीर्थेषु च शत्रुमित्रादिषु च अवसर्पा येन।

२ यत्रावतरंति जनाः पुण्यार्थमर्थार्थं वा सोमनाथ-कालप्रियादिकम्।

३ समायान्ति गोष्ठ्यां जना यस्यां सा सभा।

४ पूगाः श्रेणीगणास्तंतुवायादीनाम्।

५ प्रेक्ष्योत्स्वादिषु यत्र जनाः समवयंति।

६ द्वौ द्वौ भूत्वा द्वंद्वं युगं युगलमिति पर्यायाः। विवादो वा द्वंद्वं तद्विद्यते येषां ते क्षुद्र-कक्रत्यपक्षरक्षार्थं विवादं कुर्युः।

७ विवादस्वरूपमाह।

८ कृत्याः।

९ साधूक्तमिति।

१० कृत्यान्।

११ द्वितीयः सत्त्री।

१२ तं च पूर्वपक्षवादिनं सत्त्रिणम्।

१३ कुंकुमादि।

१४ यथोचितम्।

१५ भागम्।

१६ रक्षणसामग्रीसंपादनाय।

१७ भागेन पुष्टाः।

---

1 SJG परापसर्प। 2 S गूढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः द्वादशोध्यायः; J प्रथमेऽधिकरणे गूढ° सञ्चारो° गूढपुरुषप्रणिधिः द्वादशो;° G प्रथमाधिकरणे द्वादशो° गूढ° सञ्चारो° गूढपुरुष°। 3 S गूढपुरुषप्रणिधिः कृतमहामात्या°। 4 SG °मात्या°; Svl °मात्रा°। 5 SJG °पसर्पः। 6 SJG °पसर्पयेत्। 7 SJG सभाशालापूग°। 8 SJG 'अतिमात्रं' नास्ति। 9 पीड्यतीति। 10 Gvl चक्रुः। 11 SJG चास्य।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योग[१]क्षेमावहाः । तेषां[२] किल्बि[2]षमदण्डकरा हरन्ति । अयोग[3]क्षेमा[4]वहाश्च प्रा(प्र?)जानाम्[5] । तस्मादुञ्छषड्भागमारण्य[३]का अपि निर्व[४]पन्ति[6] 'तस्यैतद्भागधेयं योऽस्मान् गोपायतीति' । इन्द्र[7]यमस्था[५]नमेतत् राजानः प्रत्यक्ष[६]हेडप्रसादाः । तानवमा[8][२०प्र.]न्यमानान् [७]दैवोऽपि दण्डः स्पृशति । तस्माद्राजानो नावमन्तव्या इत्येवं[9] क्षुद्रकान् प्रतिषेधयेत्[८] । किंव[९]दन्तीं च विद्युः ।

ये[१०] चास्य धान्यपशुहिरण्यान्याजीवन्ति तै[११]रुपकुर्वन्ति व्यसनेऽभ्युदये[१२] वा कुपितं बन्धुं राष्ट्रं वा व्या[13][१३]वर्तयन्ति[10] अमित्र[१४]माटविकं वा प्रतिषेधयन्ति । तेषां[१५] मुण्डजटिलव्यञ्जनास्तुष्टातुष्टत्वं विद्युः ।

तुष्टान् भूयोऽर्थमानाभ्यां[11] पूजयेत् । अतुष्टांस्तुष्टिहेतोस्त्या[२०द्वि.]गेन [12]प्रसादयेत् । परस्पराद्वा भेदयेदेतान्[13][१६] सामन्ताटविकतत्कुलीनाप[14][१७]रुद्धेभ्यश्च ।

१ पुरुषार्थलाभपालनसंपादका भवन्ति ।
२ प्रजानां व्यवस्थां राजकृतामाह । राज्ञां पापमदत्तदण्डकराः प्रजा हरन्ति । प्रजानां च पापं अयोगक्षेमावहाः राजानो हरन्तीति संबंधः ।
३ वानप्रस्थाः ।
४ राजोद्देशेन भूमौ यच्छन्ति ।
५ पारत्रिकं दोषं दर्शयित्वैहिकमपि दर्शयन्नाह । उपलक्षणपरं चैतत्सकललोकपालस्थानं राजानः । तथोक्तम्–अग्निवायुयमार्काणामिंद्रस्य वरुणस्य च ।
चंद्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां नरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येव सर्वभूतानि तेजसा ॥ इति ।
६ चित्रवधादिराबाधः । हेड विबाधायामिति पाठात् ।
७ दैवस्यायं दैवः । व्याधिमरकदुर्भिक्षादिः ।
८ कृत्यभावोपगमान्निवारयेत् ।
९ राज्ञि अनुरागविरागविषयाम् ।
१० वैषयिकमहत्तरग्रामकूटश्रेष्ठ्यादयः ।
११ धान्यादिभिः ।
१२ पुत्रजन्मादौ ।
१३ सामादिभिः परविषययानात् ।
१४ विलोपार्थं स्वविषयं प्रविशन्तं दंडेन ।
१५ वैषयिकादीनां तुष्टातुष्टत्वं विदित्वा राज्ञो निवेदयेयुरिति भावः ।
१६ वैषयिकादीन् ।
१७ अन्यसंहतानुद्दिश्याह । संसक्तांताः सामंता आटविका ये प्रचंडास्तत्कुलीना राजकुलोत्पन्ना अपरुद्धाः परिवर्जितपुत्रादयस्तेभ्यश्च भेदयेदबलाः पश्चात्सामादिभिस्तुष्टा भवंति ।

1 SJG क्षेमवहाः । 2 GVl किल्बिषमदण्डकरा अयोग° । 3 SJVlG योग; SVl अयोग । 4 SJG क्षेमवहा° । 5 SJG प्रजानाम् । 6 SJG निवपन्ति; GVl निर्वपन्ति । 7 SVl इन्द्रिय° । 8 SJG °मन्यमानान्; GVl मानानां देवोऽपि दण्डं स्पृशति । 9 SJG 'एवं' नास्ति । 10 SJG व्यावर्तयन्ति । 11 SG तुष्टान् भूयः पूजयेत्; SVl अर्थमानाभ्यां पूजयेत्; J तुष्टानर्थमानाभ्यां पूजयेत् । 12 SJG साम्ना च प्रसादयेत्; GVl प्रतिसाधयेत् । 13 SJG एनान् । 14 SJG अवरुद्धे° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथाऽप्यतुष्यतो[1] दण्डकरसाधनाधिकारेण जन[1]पदविद्वेषं[2] ग्राहयेत् । विद्विष्टानुपांशु[3]दण्डेन जनपदकोपेन[4] वा साधयेत् । गुप्त[5]पुत्रदारानाकरकर्मान्तेषु वा वासयेत् परेषामास्पदभयात् ।

क्रुद्धलुब्धभीत[2](ता ?)मानिनस्तु परेषां कृत्याः[6] । तेषां[7] कार्तान्तिक[8]नैमित्तिक[3]मौहूर्तिकव्यञ्जनाः परस्पराभिसम्बन्धममित्राटविकसंबंधं[4] [२१प्र.] वा[9] विद्युः ।

तुष्टानर्थमानाभ्यां पूजयेत् । अतुष्टान् सामदानभेददण्डैस्साधयेत् ।

एवं स्वविषये कृत्यानकृत्यांश्च वि[11]चक्षणः ।
परोपजापात्संरक्षेत् प्रधानान् क्षुद्रकानपि ॥

इति विनयाधिकारिके [5]त्रयोदशोऽध्यायः ॥ छ ॥

*

[कृत्याकृत्यपक्षोपग्रहः ।]

कृत्याकृत्यपक्षोपग्रहस्स्वविषये व्याख्यातः । परविषये वाच्यः । संश्रुत्यार्थान् विप्रलब्ध[12]स्तत्तुल्यकारिणः[6] शिल्पे[7] चोपकारे च[8] विमानितः[13] वल्लभापरुद्धः[14][9] समाहूत[10]पराजितः[15] प्रवासोपतप्तः[16] [२१द्वि.] कृत्वा व्ययमलब्धकार्यः[17] स्वधर्मा-[18]

१ सामदानभेदैः ।
२ सजातीया यावद्राजकीयत्वं दर्शयंति तदा विद्विष्टा भवंति ।
३ रसदानादिना ।
४ जनपद एव कुपितस्तन्निग्रहे प्रेर्यते ।
५ निग्रहायोग्यान् ।
६ परैरात्मसात् कर्तुं शक्यंत इति कृत्याः ।
७ कृत्यानाम् ।
८ कृतान्तः सिद्धान्तः स्त्रीपुरुषलक्षणज्ञानफलं तमधीयंते ।
९ वा शब्दादपरुद्धादिभिश्च संबंधं विद्युरुपायैस्तन्निषेधार्थम् । संबंधविनाशार्त्किं तदाह ।
१० त्यक्तक्रोधादीन् ।
११ कृत्यस्वापनयनपंडितः ।
१२ अर्थान् प्रतिपाद्य वंचितः ।
१३ एतच्छब्दोपरि विस्तृता पंक्तिपरिमिता टिप्पनी लिखिता दृश्यते परन्तु समग्राऽप्यपाठ्याक्षरा ।
१४ राजवल्लभैर्बहिःकृतः ।
१५ समाहूय व्यवहारे पक्षपातात्पराजितः ।
१६ प्रवासेन भूयोभूयः क्रियमाणेनोपतप्तः ।
१७ कृत्वा व्ययं पण्यागारढोकनिकयाऽलब्धसमीहितकार्यः ।
१८ ब्राह्मणादीनां षट्कर्मादेः ।

1 SJG वा जनपद° । 2 SJG अवमानिन° । 3 SJG नैमित्तिक° । 4 S JvI G °बन्धं अमित्रप्रति°; SvIJ अमित्राटविकप्रति°; GvI °बन्धं मित्राटविक संबंध° । 5 S स्वविषये कृत्याकृत्यपक्षरक्षणं त्रयो°; J प्रथमेऽधिकरणे स्व° कृत्या° त्रयो°; G प्रथमाधिकरणे त्रयो° स्व° कृत्या° । 6 SvIJ तुल्याभिकारि° । 7 SJG चोपकारे । 8 SJG वा । 9 SJG °वरुद्धः । 10 SJG समाहूय ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दायाद्यादपरुद्धः[१][1] । मानाधिकाराभ्यां[२] भ्रष्टः[2] कुल्यैरन्तर्हितः[3][३] प्रसभाभिमृष्टस्त्रीकः[४] काराभिन्यस्तः[4][५] परोक्तदंडितः[5][६] मिथ्याचारवारितः[7][६] सर्वस्वमाहारितः[7] बन्धनपरिक्लिष्टः प्रवासितबन्धुरिति[९] क्रुद्धवर्गः[१०] ॥

स्वयमुपहतः[११] विप्रकृतः[१२][8] पापकर्माभिख्यातः तुल्यदोषदण्डेनोद्विग्नः पर्यात्तभूमिः दण्डोपनतः[9][१३] सर्वाधिकरणस्थः सहसोपचितार्थः[10] तत्कुलीनोपाशंसुः[१४][11] प्रद्विष्टो राज्ञा राजद्वेषी चेति भीतवर्गः ॥

परिक्षीणः अन्यात्तस्वः[12] कदर्यः मूलहरः तादात्विकः[13] व्यसनी अत्याहितव्यवहारश्चेति[१५] लुब्धवर्गः ॥

आत्मसंभावितः[१६] [२२ प्र.] मानकामः[१७] शत्रुपूजामर्षितः[१८] नीचैरुपहितः[१९] तीक्ष्णः साहसिकः भोगेनासन्तुष्ट इति मानिवर्गः ॥

---

१ न्यायलभ्यात् दायलभ्यद्रव्यांशात् बहिःकृतः ।

२ आसनादिकात् मानात् समाहर्तृत्वादेरधिकारात् भ्रष्टः ।

३ दायादैस्तिरोहितः ।

४ बलाद्दूषितस्त्रीको राज्ञाऽन्येन वा । उक्तं च–
स्तेनः साहसिको हिंस्रः पारदारिक एव वा । राज्ञा स्यादपराधेन ये चान्ये पापकारिणः ॥

५ दोषं विना बंदिशालायां क्षिप्तः ।

६ पिशुनवचनेनाविचार्य दंडितः क्रुध्यति । उक्तं च–
यानि मिथ्याभिशस्तानां पतंत्यश्रूणि रोदनात् । तानि पुत्रपशून् घ्नंति राज्ञस्त्राणमकुर्वतः ॥

७ त्रिवर्गशून्यात् द्यूतादिव्यसनान्निवारितः । उक्तं च–
रिपूभवंति दुःप्रज्ञा मिथ्याचारनिवारिता इति ॥

८ गृहीतसर्वस्वः ।

९ यमपुरं प्रेषितबांधवः ।

१० वर्गग्रहणं वाक्पारुष्यादीनां ग्रहणार्थम् ।

११ कोशं दण्डं च विनाश्याकृतकार्यो भीतो भवति ।

१२ विरुद्धं प्रकर्षेण कृतं राजद्विष्टमभिचारादि......... ।

१३ ....अनुक्तोऽपि शत्रुवधं प्रतिज्ञाय प्रार्थितकोशदण्डः ।

१४ यत्कुलं राज्ञस्तत्कुलापत्यं स यदि राजा भवतीति कुलसंबंधः तेन राजनिग्रहा.........

१५ स व्यवहारो महा......... ।

१६ रूपशोभादिभिरात्मनैवात्मानं संभावयन्......... ।

१७ अनात्मसंभावितोऽपि मानमिच्छति ।

१८ शत्रौ पूजामसहमानः । अत्र च अमर्षोऽसहनं न क्रोधः ।

१९ टिप्पनीयमस्पष्टाक्षरा ।

---

1 SJG उपरुद्धः । 2 svl भृष्टः । 3 SJvl तुल्यै°; svl कुल्यै° । 4 J करादि° । 5 S परोक्ष; svl परोक्त । 6 Gvl °चारपातितः । 7 SJvl सर्वसमाहारितः; svl सर्वस्व° । 8 svl Jvl विप्रकृष्टः । 9 SJG दण्डेनोपहतः । 10 J साहसो । 11 S °नोवाशंसुः । 12 SJG अत्यात्तस्वः । 13 SJG 'मूलहरः । तादात्विकः'।' नास्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेषां[१]* मुण्डजटिलव्यञ्जनैर्यो यद्भक्तिः कृत्यपक्षीयस्तं तेनोपजापयेत् ।

यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद्यदासादयति तत्सर्वं प्रमृद्नाति एवमयमशास्त्र[२]चक्षुरन्धो राजा [1]पौरजानपदवधायाभ्यु[३]त्थितः । शक्यमस्य प्रतिहस्तिप्रोत्साहनेनापकर्तुममर्षः[2] क्रियतामिति क्रुद्धवर्गमुपजपे(जापये ?)त्[3] ।

यथा लीन[4]ः सर्पो यस्माद्भयं पश्यति तत्र विषमुत्सृजति । एवमयं राजा जातदोषाशङ्कस्त्वयि पुरा क्रोधविषमुत्सृजति अन्यत्र गम्यतामिति भी-[२२ द्वि.] तवर्गमुपजापयेत् ॥

यथा श्वगणिनां धेनुः श्वभ्यो दुह्यते[5] न ब्राह्मणेभ्यः । एवमयं[४] राजा सत्त्वप्रज्ञावाक्यशक्तिहीनेभ्यो दुह्यते[6] नात्मगुणसम्पन्नेभ्यः । असौ[५] राजा पुरुषविशेषज्ञस्तत्र गम्य[7]तामिति लुब्धवर्गमुपजापयेत् ॥

यथा चण्डालोदपानश्चण्डालानामेवोपभोग्यो नान्येषामेवमयं राजा नीचो[६] नीचानामेवोपभोग्यो न त्वद्विधानामार्याणामसौ राजा पुरुषविशेषज्ञः[७] तत्र गम्यतामिति मानिवर्गमुपजापयेत् ॥

[८]तथेति प्रतिपन्नांस्तान् संहितान् पणकर्मणा ।
योजयेत यथाशक्ति सा[8]वसर्पान् कर्मसु[9] ॥
लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु ।
अकृत्यान् भेददण्डाभ्यां [९]परदोषांश्च दर्शयन्[10] ॥

इति विनयाधिकारिके चतुर्दशोऽध्यायः ॥[11]

*

१ *

२ शास्त्रचक्षुर्मंत्री । स न विद्यते यस्य यत्र स्थानीयं स्वयमप्यंधः ।

३ जनपदवधाय उद्यतः । ४ भवस्वामी । ५ विजिगीषुमुद्दिश्य ।

६ विस्तृतायाः टिप्पन्या एतान्येव वाक्यानि पठ्यन्ते—"असौ भवस्वामी राजा नीचो नीचानामेवोपभोग्यो न भवद्विधानां मानीनामिति भावस्तथा चोक्तं—
कविषु कवयो......नीचा-नीचेष्वभिरमंत इति ।"

७ ......पुरुषविशेषज्ञो मानीनां मानोन्नतिकर्ता । उक्तं च...... ।

८ तथेति यथा मुंडादिभिरुपजप्योक्ता यथा अपकारार्थं भयापगमार्थं महालाभार्थं मानोन्नत्यर्थं च विजिगीषुराश्रयणीय इति । तथेति प्रतिपन्नांस्तान् क्रुद्धादीन् संहितान् कृतसन्धानान्यकर्मणो............क्रियया योजयेन्नियोजयेद् । यथाशक्ति शक्त्यनतिक्रमेण । यत्कर्म यः कर्तुं शक्नोति । सावसर्पान् कृतगूढपुरुषप्रणिधानान् स्वकर्मसूद्दिष्टेषु कर्मसु ।

९ भेददंडाभ्यां शत्रुणा सह भेदं कारयित्वा उपांशुवधं शत्रुणा कृतं रूपयित्वा हतबांधवानकृत्यानपि पश्चाल्लभेत परदोषांश्च दर्शयन् । क्रूरो लुब्धः कृतघ्न इत्यादिकान् ।

1 G राजान्धेन मन्त्रिणाधिष्ठितः पौर° । 2 svl °नापकर्तुमेषः । 3 SJG उपजापयेत् । 4 J भीतः । 5 SJG दुग्धे । 6 SJG दुग्धे । 7 SG सेव्यतामिति; Jvl स सेव्य° । 8 SJG सापस° । 9 SJG स्वकर्मसु । 10 SJG दर्शयेत् । 11 S परविषये कृत्याकृत्यपक्षोपग्रहः चतु°; J प्रथमेऽधिकरणे पर° कृत्य° चतु°; G प्रथमाधिकरणे चतु° पर° कृत्या° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[मन्त्राधिकारः ।]

कृतस्वपक्षपरपक्षोपग्रहः[१] कार्यारम्भां[२]श्चिन्तये[1] [२३ प्र.] त्।

मन्त्रपूर्वाः सर्वारम्भाः । तस्योद्देशः[३][2] संवृतः कथानामनिःश्रावी[3] पक्षिभिरप्यनालोक्यः[४] स्यात् । श्रूयते हि शुकसारिकाभि[4]र्भिन्नो[5] मन्त्रः श्वभिरप्य[6]न्यैश्च तिर्यग्योनिभिरिति[7] । तस्मान्मन्त्रोद्देशमनायुक्तो नोपगच्छेत् । उच्छिद्येत हि[8] मन्त्रभेदी[५]* । मन्त्रभेदो हि दूतामात्यस्वामिनामि[६]ङ्गिताकाराभ्याम् । इङ्गितमन्यथावृत्तिः । आकृतिग्रहणमाकारः । तस्य[७] संवरणमायुक्तपुरुषरक्षणमाकार्यकालादिति[८] । [९]तेषां हि प्रमाद[१०]मद[११]सुप्त[१२]प्रलापाः[९][१३] कामादिरुत्सेकः प्रच्छन्नोऽवमतो[१४] वा मन्त्रं [१५]भिनत्ति । तस्माद्रक्षेन्मन्त्रमिति[10] प्रतीतम् ।

मन्त्रभेदो ह्ययोग[11]क्षेमकरो[१६] राज्ञस्तदायुक्तपुरुषाणां च ।

तस्माद्गुह्यमेको मन्त्रयेतेति भारद्वाजः । मन्त्रिणामपि हि मन्त्रिणो भवन्ति । [12]सैषा मन्त्रिपरम्परा मन्त्रं भिनत्ति । तस्मात्

१ पक्षशब्देन कृत्याकृत्यपक्षो गृह्यते । तस्योपग्रहः स्वीकारः । स्वमंडले परमंड[ले]च येन कृतः ।
२ संधिदुर्गादिकार्याणामारंभान् ।
३ तस्योद्देशः प्रदेशो मंत्रणागारमित्यर्थः ।
४ ....किंभिस्तिर्यग्योनिभिरप्यनालोक्यः अदृश्यः स्यात् ।
५ *
६ त एव यतो मंत्रे अधिकृताः ।
७ इंगिताकारलक्षणस्य मंत्रभेदद्वारस्य गोपनमनुपलक्षणार्थम् ।
८ दूतामात्यस्वामिनां रक्षणं स्त्रीपानादिपरिहारेण ।
९ अन्यान्यपि मंत्रभेदद्वाराणि दर्शयन्नाह ।
१० कार्यान्तरासंगेन मंत्ररक्षाविस्मरणम् ।
११ सुरादिना मत्तता ।
१२ निद्रालुब्धत्वम् ।
१३ ते प्रलापाः ।
१४ कुड्यान्तरितः ।
१५ अरक्षणमवज्ञानं कामादीङ्गितविक्रियाः । प्रमादादिप्रलापश्च मंत्रमार्गास्त्रयोदश ॥
त्रयोदशेति मंत्रस्य ज्ञात्वा द्वाराणि पार्थिवः । संवृत्य मंत्रयन् विद्वान् कर्मणां फलमश्नुते ॥
१६ यथा ध्रुवदेव्या कृतो रामगुप्तशरीरस्य ।

1 S चिन्तयेत । 2 SJG तदुद्देशः । 3 SJG निस्रा° । 4 SJG शारिकाभिः । 5 SJG मत्रो भिन्नः । 6 SJG 'अपि' नास्ति । 7 SJG 'इति' नास्ति । 8 SJG 'हि' नास्ति । 9 SJG प्रलापकामा° । 10 SJG 'इति प्रतीतं' नास्ति । 11 SGvl भेदोऽन्ययोग; Svlj भेदोऽयोग । 12 SJG भवन्ति । तेषामप्यन्ये; सैषा°; Gvl भवन्ति । सैषा° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नास्य [२३ द्वि.] गुह्यं[1] परे विद्युः कर्म्म [१]किञ्चिच्चिकीर्षितम् ।
[2]आरब्धारस्तु जानीयुरारब्धं कृतमेव वा ॥

नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः । प्रत्यक्षपरोक्षानुमेया हि राजं[२]वृत्तिः । अनु[३]पलब्धस्य ज्ञानमुपलब्धस्य निश्चितं[3]बला[४]धानमर्थद्वैधस्य संशयच्छेद[५]नमेकदेशदृष्टस्य शेषोप[६]लब्धिरिति मन्त्रिसाध्यमेतत् । तस्माद् बुद्धिवृद्धैः सार्द्धमध्या[4]सीत मन्त्रम् ।

न कश्चिदवमन्येत सर्वस्य शृणुयान्मतम् ।
बालस्याप्यर्थवद्वाक्यं[5]मुपयुञ्जीत प[७]ण्डितः ॥

एतन्मन्त्रज्ञानं नैतन्मर्म[८]रक्षणमिति पारासरा[6]ः । यदस्य कार्यमभिप्रेतं तत्प्रतिरूप[९]कं मन्त्रिणः पृच्छेत्[7] ।

१......रो जानीयुस्तत्राप्यारब्धं कृतमेव वा । आरब्धं विवेकिनः कृतमितरे जानंति । यथा राजा जनपदांते स्वनिहितं ध्रुवं निधिं खानयन् ब्रूते—खन्यतामत्र कूप इति । तत्र विवेकिनो नेदं कूपस्थानमवश्यमत्र..........कनककलशदर्शनात् ।

२ प्रत्यक्षागमानुमानप्रमाणत्रयेण राज्ञो व्यवहार एतदेव दर्शयन्नाह ।

३ अप्रतीतस्याप्तवचनादेव ज्ञानम् ।

४ उपलब्धस्यापि प्रत्यक्षेण । तत्त्वाभासभूयस्त्वे प्रत्यक्षाभासविप्रलब्धत्वानिश्चये बलं न भवति । तदाधानमपि मंत्रिसाध्यम् । ते हि निरपवादैः स्वमतिविभवैः पूर्वपक्षमुद्भाव्य सिद्धान्तप्रदर्शनाद्राज्ञोपलब्धस्य निश्चितबलाधानं कुर्वन्ति ।

५ कार्यद्वैधे मंत्रिण एव इत्युक्तिभिः संशयच्छेदः ।

६ एकोऽवयवो राज्ञा दृष्टो यस्य कार्यस्याशेषावयवानां तु मंत्रिभिरुपलब्धिः क्रियते । तद्यथा संधिविग्रहयोस्तुल्यायां बुद्धौ संधिः श्रेयान् । विग्रहे हि क्षयव्ययादयो भवंति । इति राज्ञोपलब्धम् । तत्र मंत्रिणो विशेषं दर्शयंति । संधिरपि भेदपूर्वः श्रेयान् न विग्रहपूर्व इति शेषोपलब्धिरेतदखिलं मंत्रिसाध्यं........... ॥

७ एवं हि पाण्डित्यं भवतीति भावः । उक्तं च—
अप्युन्मत्तात्प्रलपतो गच्छतः स्वपतोपि वा । सर्वस्मात्सारमादेयं धातुभ्य इव कांचनमिति ॥

८ बहुश्रोतृगतत्वात् ।

९ तत्समानमध्यारोपितं कृत्वा मंत्रिणः पृच्छेत् ।

1 SJG तस्मान्नास्य परे विद्युः । 2 SJG अरब्धास्तु । 3 SJ निश्चय; G निश्चयो निश्चितस्य: । 4 SJG °मासीत । 5 SJ °वाख्यं । 6 S पराशरः; JG पाराशराः । 7 SJG मुद्रितेषु पुस्तकेषु 'पृच्छेत्' इत्यनन्तरं "कार्यमिदमेवमासीदेवं वा यदि भवेत्तत्कथं कर्तव्यमिति । ते यथा ब्रूयुः तत्कुर्यात् । एवं मन्त्रोपलब्धिः संवृतिश्च भवतीति ।" इति पठ्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेति पिशुनः । मन्त्रिणो हि [१]व्यवहितमर्थं[२] वृत्तमवृत्तं वा पृष्टा[1] अनादरेण[३] ब्रुवन्ति प्रकाशयन्ति वा [४]सदोषाः[2] । तस्मात्कर्म्मसु ये [3]ये [२४ प्र.] ष्वभिप्रेतास्तैः सह मन्त्रयेत् । तैर्म्मन्त्रयमाणो मन्त्रसिद्धिं गुप्तिं च लभते[५] ।

नेति कौटल्यः । अन[६]वस्था ह्येषा । मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेतेति[6] ।

मन्त्रयमाणो ह्येके[७]नार्थकृच्छ्रे[7] निश्चयं नाधिगच्छेत् । एकश्च मन्त्री यथेष्टमनवग्रहश्चरति ।

द्वाभ्यां मन्त्रयमाणो[8] विगृहीताभ्यां विना[९]श्यते । संहताभ्यामवगृह्यते[८] । [१०]तत्[9] त्रिषु चतुर्षु वा [10]कृच्छ्रेणोपपद्यते । महादोषमुपपन्नं[11] तु भवति । ततः परेषु कृच्छ्रे[११]णार्थनिश्चयो गम्यते मन्त्रो वा रक्ष्यते ।

देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथा[१२]सामर्थ्यं मन्त्रयेत्[12] ।

१ देशकालपुरुषादिभिः ।

२ कार्यम् ।

३ नैतत्स्वामिकार्यमिति न सम्यक् परामर्शपूर्वकं कथयन्ति ।

४ *

५ दुर्गसन्ध्यादिषु ये पुरुषाः स्थपतिदूतादयः अभिप्रेता योग्यताप्रदर्शनेन ।

६ विस्तृतायाः टिप्पन्या एतान्येव वाक्यानि पठ्यन्ते–"भारद्वाजमते......गुप्तिमात्रमेव । असिद्धस्य च गुप्तिर्वृथा । विशालाक्षमते मंत्रसिद्धिरस्ति । न गुप्ति...... । पिशुनमतेऽपि कार्यानंत्यान्नियुक्तपुरुषानंत्यम् । न च सर्वे मंत्रिणो भवंति । मंत्रिगुणाभावान्न मंत्रोपलब्धिरनुपलब्धस्य किं रक्षया नियतमंत्र्यभावे षडंगं...... । एवं मंत्रस्यानवस्थानात् मंत्रि.........अनवस्थाप्रतिषेधार्थमाह ।

७ कार्यघटने (?) ।

८ निरंकुशश्चरति राज्यमाक्रम्य भुंक्ते । वृद्ध्या चित्तविकारे सति राज्यमपि गृह्णातीतिभावः । कौटल्यः न । व्यभिचार इति चेन्न तादृग्विधानां निस्पृहाणामसंभवात् ।

९ परस्परभेदाद्विवादेन......निश्चयाभावाद् विनाश्यते मंत्रमूलत्वात्सर्वारंभाणाम् ।

१० तदिति एकमंत्रित्वे मंत्रनिश्चयानधिगमो यथेष्टाचरणं द्विमंत्रित्वे संहतत्वेन विग्रहो विगृहीतत्वेन विनाशनमित्येतद्दोषचतुष्टयम् । कृच्छ्रेणोपपद्यते । बहूनामेकमतस्य दुर्घटत्वात् । यदि तु काकतालीयत्वादुपपन्नं तदा तु ......महांत एव दोषा भवन्तीत्यर्थः ।

११ प्रकीर्णलोपत्वात् ।

१२ मंत्रे सामर्थ्यं शास्त्रचक्षुष्मत्तां निरतिशया प्रज्ञा लोकव्यवहारकौशलं च । तद्यस्य राज्ञस्तस्य मंत्रिदोषा न प्रभवंत्युक्तं च—दोषवंतोऽप्यदोषत्वं विदुषो यांति मंत्रिणः ।
सदोषैरपि दीप्ताग्नि राज्य............ ॥

1 SJG पृष्टं°; GVl °ष्टा । 2 SJG स दोषः । 3 J येषु ये । 4 SG हि मन्त्रबुद्धिं; J वृद्धिं । 5 SJG लभत इति । 6 SJ मन्त्रयेत्; G मन्त्रयेत । 7 SJG कृच्छ्रेषु । 8 SJG द्वाभ्यां मन्त्रयमाणो द्वाभ्यां संहताभ्यामवगृह्यते (GVl ह्यते तत् त्रि°) विगृहीताभ्यां विनाश्यते । 9 SJG 'तत्' नास्ति; SVl तत्त्रिषु । 10 SJG नैकान्तं कृच्छ्रेणो° । 11 SVl J GVl दोष उपपन्नस्तु । 12 SJG मन्त्रयेत ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्म्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागौ[1] विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः ।

तानेकैकशः पृच्छेत् स-[२४ द्वि.] मस्तांश्च हेतुभिश्चैषां मतिप्रविवेकान् विद्यात्[2][१] ।

अवाप्तार्थः कालं[२] नातिक्रामेत्[3] । न दीर्घकालं मन्त्रयेत्[३][4] ।

न[5] तेषां पक्षीयै[6]र्येषामपकुर्यात्[४] ।

मन्त्रि[५]परिषदं द्वाद[६]शामात्यां कुर्वीतेति मानवाः । षोड[७]शेति बार्हस्पत्याः । विंश[८]तिमित्यौशनसाः । यथासाम[९]र्थ्यमिति कौटल्यः ।

ते ह्यस्य स्व[१०]पक्षं परपक्षं च चिन्तयेयुः । अकृतारम्भमारब्धानुष्ठानमनुष्ठितविशेषं नियोग[११]सम्पदं च कर्मणां कुर्युः ।

[१२]अनासन्नैस्सह पत्रसंप्रेष[२५ प्र.]णेन मन्त्रयेत्[7] । आ[8]सन्नैः[१३] सह कार्याणि पश्येत्[9] ।

इन्द्रस्य हि मंत्रिपरिषद् ऋषीणां सहस्रं स[10] तच्च[१४]क्षुस्तस्मादिन्द्रं[11] सहस्रा[12]क्षमाहुः ।

---

१ तन्मतिभिरात्ममतिशोधनार्थं च । उक्तं च—

आदायादाय मंत्रिभ्यो ज्ञानं ज्ञानेन शोधयेत् ।
पीतमाचमनेनेव तोयं तोयेन बुद्धिमानिति ॥

२ कालातिपत्तिर्हि कायरसं पिबतीत्युक्तेः ।

३ मंत्रभेदभयात् ।

४ दुर्योधनः पांडवपक्षपातिना विदुरेणेव ।

५ अभिहितमंत्रिव्यतिकरेण मंत्रिपरिषदपि कर्तव्येत्याह । तत्र संख्यां प्रत्याचार्यविप्रतिपत्तिः ।

६ द्वादशराजकमंडलचरितनिरूपणाय ।

७ अरिविजिगीषु मध्यमोदासीनेषु । एकेन निर्णेतुमशक्यत्वादादरार्थं च द्वौ द्वाविति मन्यते ।

८ आदरनिरूप्ये मंडलचतुष्टये मंत्रित्रयं कृत्वा विंशतिमिति ।

९ यदि पुरुषांस्तद्वृत्तये अर्थं लब्धुं समर्थस्तदा सहस्रमंत्रिपरिकल्पिता परिषद् कुर्यादिति भावः । मंत्रिपरिषद्विधेयमाह ।

१० स्वपक्षं स्वमंडलं परपक्षमितराश्रय...... कृत्याकृत्यपक्षोपग्रहषाड्गुण्योपदेशादिना तथा ।

११ पुरुषबाहुल्यम् ।

१२ कार्यादिव्यवहितैः पत्रसंप्रेषणेन कार्यप्रेरणपुरःसरणेन...... ।

१३ पारिषदैः सह कार्याणि तंत्रावापगतानि निरूपयेत् ।

१४ अनेनैतदभिहितं भवति । यथा राजा शास्त्रचक्षुश्चारचक्षुरेवं मंत्रिचक्षुरपि भवति ।

---

1 SJG विभागः । 2 J एकैकं मतं प्रविशेद्विद्वान् । 3 SJG क्रामयेत् । 4 SJG मन्त्रयेत । 5 S च तेषां; J च तेषां च; G न च तेषां । 6 S पक्षैः, svl G पक्ष्यैः; J रक्षेत् । 7 SJG मन्त्रयेत । 8 svl अनासन्नैः । 9 SJG आसन्नैस्सह कार्याणि पश्येत् । अनासन्नैस्सह पत्रसंप्रेषणेन मन्त्रयेत । 10 S 'स' नास्ति । 11 SJG इमं । 12 SJG द्व्यक्षं सहस्रा° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्ययिके[1] कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात्[2]। तत्र यद्भूयिष्ठ ब्रूयुः कार्यसिद्धिकरं च तत्कुर्यात्[1]।

नास्य[3] गुह्यं परे विद्युच्छिद्रं विद्यात्परस्य च[5]।
गूहेत्कूर्म इवाङ्गानि यत्स्याद्विवृतमात्मनः[6] ॥
यथा ह्यश्रोत्रियः[7] श्राद्धं न सतां भोक्तुमर्हति।
एवमश्रुतशास्त्रार्थो[8] न मंत्रं श्रोतुमर्हति ॥

तथा[3] च बृहस्पतिः–

अनधीत्य हि [२५ द्वि.] शास्त्राणि बहवः पशुबुद्धयः।
प्रागल्भ्याद्वक्तुमिच्छंति मंत्रेष्वभ्यंतरीकृताः ॥
अनर्थविदुषां तेषां श्रोतव्यं नहि भाषितम्।
अर्थतत्त्वमविज्ञाय विपुलं श्रेय इच्छता ॥

इति विनयाधिकारिके पञ्चदशोऽध्यायः[4] ॥

*

[दूतप्रणिधिः।]

उद्धृतमन्त्रो[5] दूतप्रणिधिः[9]। अमात्यसम्पदोपेतो[10] निसृष्टार्थः[11]। पादगुण-

१ विनाशोन्मुखे।
२ विवक्षितमिति शेषः।
३ कुर्वंतश्चेत्युत्तरेण संबंधः।
४ पूर्वोक्तचक्षुस्त्रयेण।
५ चकारात् आत्मनश्च परस्य प्रहर्तुमात्मनो निगूहनार्थम्।
६ आत्मन इति मंत्र एवात्मा राज्ञः।
७ श्रोत्रियाणाम्।
८ अनधीतनीतिशास्त्रः।
९ दुनोति शत्रुं स्वानुष्ठानेनेति दूतस्तस्य प्रणिधानं स्वव्यापारे स्थापनं दूत एव वा प्रणिधिः। प्रणिधिशब्दस्य चरपर्यायत्वात्। शत्रुवृत्तांतोऽ......नापि ज्ञातव्य इति। गृहीतो मंत्राधिकारात्। मंत्रो येन स प्रतिष्ठेतेति संबंधः।
१० जानपदादिपंचविंशतिगुणपरिकल्पितया उपेतो युक्तः।
११ निसृष्ट उत्सृष्टो नियमाभावात्संधिविग्रहादिको अर्थो यस्य।

1 SJG कार्यसिद्धिकरं वा ब्रूयुः। 2 SJG कुर्यात्। कुर्वंतश्च। 3 SJG मुद्रितेषु पुस्तकेषु एते श्लोकाः न सन्ति। 4 S मन्त्राधिकारः पञ्चदशो°; J प्रथमेऽधिकरणे मन्त्रा° पञ्च°; G प्रथमाधिकरणे पञ्च° मन्त्रा°। 5 SJG उद्धृत।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हीनः परिमितार्थः[1]। अर्धगुणहीनः शासनहरः[2]। सुप्रतिविहितयान[3]वाहन[4]पुरुष[5]परिवापः[6] [२६ प्र.] प्रतिष्ठेत।

शासनमेवं[7] वाच्यः[8] परः[9] स वक्ष्यत्येवं तस्येदं प्रतिवाक्यमेवमतिसन्धातव्यमित्यधीयानो गच्छेत्। अटव्य[10]न्तपाल[11]पुर[12]राष्ट्रमुख्यैश्च[13][14] प्रतिसंसर्गं गच्छेत्। अनीकस्थान[15]युद्ध[16]प्रतिग्रहा[17]पसार[18]भूमीरात्मनः[19] परस्य[20] चावेक्षेत[21]। दुर्ग[22]राष्ट्र[23]प्रमाणं[24] सा-

१ अस्मान् वेत्थ परान् वेत्थ वेत्थार्थान् वेत्थ भाषितुम्।
यद्यदस्मद्धितं कृत्स्नं तत्तद्वाच्यः सुयोधन इति ॥

अत्र वचनमर्थश्चानियतः। संधिर्विग्रहो वा कर्तव्य इति परिमितो नियतोऽर्थो यस्य। वचनानां त्वनियमः।

२ अवरमंत्रिवच्छास्यतेति संधानाद्रक्ष्यतेऽनेनेति शासनं स्वामिसंदेशः। तं हरतीति चित्तस्थं पत्रस्थं वा। अत्र वचनार्थयोर्नियमः।

३ शिबिकादि।

४ हस्त्यश्वादि।

५ पौरुषयुक्ता आयुधीयाः पुरुषाः।

६ पटकुटीच्छत्रासनार्थादिः परीवापः।

७ गच्छतस्तस्यानुष्ठानमाह।

८ निसृष्टार्थोऽपि स्वमतिपरिकल्पितमुत्तरोत्तरवाक्यं अत एव शासनमिति नात्र लेखो गृह्यते। एवमिति हृदयस्थान् बहून् वचनक्रमान् सूचयति। परिमितार्थोऽपि स्वमतिपरिकल्पितानामेवार्थानामनतिक्रमेण। शासनहरस्तु यथा संदिष्टं वाच्यः परः।

९ शत्रोरिति शेषः।

१० अभ्यासस्योत्कर्षप्राप्त्यर्थं यात्रासौकर्यार्थमाह। अटवी = तत्स्थाः।

११ स्वपरमंडलांतरालवर्तिनोऽन्तपालाः।

१२ स्वपरजनपदांतस्थाः पुरमुख्याः नागरिकादयः।

१३ ग्रामकूटमहत्तरादयो राष्ट्रमुख्याः।

१४ चकारात् श्रेणिमुख्यादयः। स्वकीयैः परोपजापज्ञानार्थं परकीयैरनिष्टप्रतिविधानार्थं यात्रासौकर्यार्थं च।

१५ स्कन्धावारनिवेशभूमिः।

१६ स्वबलानुकूला।

१७ 'द्विशते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रह' इति तस्य भूमिः।

१८ कलत्रस्थानं अपसारः।

१९ स्वस्वामिनः।

२० शत्रोः।

२१ अनुकूलानामात्मना प्रतिग्रहार्थं परभूमीनां च छिद्रप्रदेशज्ञानार्थम्।

२२ ग्रहणार्थं तदनुभू(रू?)पबलोपादानार्थं च।

२३ परस्य तदनुरूपकोशपरिच्छित्त्यर्थं लाभे चोत्तमस्य प्रतिग्रहार्थं राष्ट्रप्रमाणम्।

२४ सप्तांगेष्वपि यत्सारभूतम्।

1 SVl J वाच्यम्। 2 SJG चावेक्षेत।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्ववृत्ति[१]गुप्ति[२]च्छिद्राणि[३] चोपलभेत । पराधिष्ठानमनुज्ञातः प्रविशेत् । [४]शासनं च [५]यथोक्तं ब्रूयात् । प्राण[६]बाधेऽपि दृष्टे पर[७][२६ द्वि.]स्य वाचि वक्रे दृष्ट्यां च प्रसादं वाक्यपू[८]जनमिष्टपरिप्रश्नं[९] गुणकथासंगमासन्नमासनं सत्कारमिष्टे[1]षु [१०]स्मरणं विश्वासग[११]मनं च लक्षयेत्तुष्टस्य विपरीतमतुष्टस्य[१२] ।

तं[१३] ब्रूयात् दूतमुखा[2] हि[3] राजानस्त्वं[१४] चान्ये[१५] च तस्मादुद्य[4]तेष्वपि शस्त्रेषु यथोक्तं[१६] वक्तारो दूता[5]ः । तेषामन्तावसायिनोऽप्य[6]वध्याः । किमङ्ग पुन[१७]र्ब्राह्मणा[7]ः । परस्यैतद्वाक्यमेष दूतधर्म इति[१८] ।

[१९]वसेद[२०]वि[सृ]ष्ट[8]ः । पूजया[२१][9] नोत्सिक्तः । परेषु[२२] बलित्वं[२३] न

---

१ कृष्यादीनां येन वर्तते । तन्निरोधार्थम् ।

२ गुप्तिं रक्षाम् ।

३ रक्षाशैथिल्यं व्यसनादि वा छिद्रम् ।

४ अनुज्ञात इति वर्तते ।

५ शास्त्रेण स्वामिना वा ।

६ आत्मनो विनाशेऽपि दृष्टे ।

७ प्राणाबाधश्चानागतमिंगितादिभिर्दृश्यते । तावत्तुष्टेरिंगितमाह ।

८ दूतवाक्यस्य साधूक्तमिति ।

९ दूतस्य दूतस्वामिनो वा ।

१० इष्टेषु परस्य संपन्नेषु दूतस्य स्मरणम् ।

११ गुह्याख्यानादि ।

१२ विपर्ययाख्या तंत्रयुक्तिरियम् ।

१३ तं अतुष्टं प्राणाबाधपरिहारार्थं ब्रूयात् ।

१४ न केवलमस्मत्स्वाम्येव त्वं च ।

१५ भूतभविष्यवर्तमाना राजानः ।

१६ स्वामिनेति शेषः ।

१७ अब्राह्मणोऽपि ब्राह्मणसमो दूतो द्रष्टव्यः । अब्राह्मणस्य च दूतत्वप्राप्तिः वक्ष्यमाणात्प्रतिषेधात् । उक्तं च मनुना–यथोक्तवादिनं दूतं क्षत्रधर्ममनुस्मरन् ।
यो हन्यात्पितरस्तस्य भ्रूणहत्यामवाप्नुयुरिति ॥

१८ परस्यैतद्वाक्यमेष दूतधर्म इति । परस्य विजिगीषोरेतद्वाक्यं न मया स्वेषादभिधीयते इति भावः । तत्त्वं किमिति ब्रूषे एवं चेत् एष दूतस्य धर्मः ।

१९ दूतसमाचारमाह ।

२० परेणेति शेषः ।

२१ परकृतया ।

२२ दुर्बलेष्वपि ।

२३ स्वामिबलादात्मबलाद्वा बलवानिति वाक्पारुष्यं न ब्रूयादित्यर्थः ।

---

1 J °मिष्टेऽनुसरणं । 2 svl Gvl दूतमुखेन राजान° । 3 sJG वै । 4 s °दुद्धृते; svl °यते । 5 sJG वक्तारस्तेषां । 6 svl Gvl °मन्तेवासिनो । 7 s ब्राह्मणः । 8 svl °दवसृष्टः । 9 sJ प्रपूजया; svl पूजया ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मन्येत[१][1] । वाक्यम[२]निष्टं सहेत[३] । स्त्रियः[४] पानं च वर्जयेत् । [२७प्र.] एकः शयीत । सुप्तमत्तयोर्हि भावज्ञानं[५] दृष्टम् । कृत्यपक्षोपजापम[६][७]कृत्यपक्षे गूढप्रणिधानं[८] रागा[९]-परागौ[2][१०] भर्तरि । रन्ध्रं[११] च प्रकृतीनां[१२] सिद्ध[3]तापसवैदेहकव्यञ्जनाभ्यामुपलभेत । तयोर[१३]न्तेवासिभिश्चिकित्सकपाषंडव्यञ्जनोभयवेतनैर्वा । तेषामसम्भाषायां[१४] याचनक[4][१५]मत्तोन्मत्तसुप्तप्रलापैः पुण्यस्थान[१६]देवगृह[१७]चित्र[5]लेख्य[१८]संज्ञाभि[१९]र्वा चारमुपलभेत । उपलब्ध[२०]स्य उपजापमुपेयात् । परेण चोक्तः स्वासां प्रकृतीनां[२१] प्रमाणं[6] नाचक्षीत । सर्वं वेद भवा[२२]निति ब्रूयात्[२३] । कार्यसिद्धिकरं[२४] वा ब्रूयात्[7] कार्यस्यासिद्धावुपरुध्यमानस्तर्कयेत्[२५] ।

१ उक्तं च—वासुदेवसहायोपि यो हतो हत एव सः ।
२ परेणोक्तमिति शेषः ।
३ दूतकार्यसिध्यर्थम् ।
४ प्रमादमंत्रभेदयोः प्रतिषेधार्थम् ।
५ चित्त.........मंत्रस्य ।
६ अन्यच्च ।
७ उक्तेन न्यायेन ।
८ कृत्यतापादनार्थम् ।
९ अनुरक्तानां.........नार्थम् ।
१० विरक्तानां स्वीकरणार्थम् ।
११ छिद्रम् ।
१२ तासामेव । परेति शेषः ।
१३ तयोरेव ।
१४ असंभाषायां शत्रुकृतनिषेधात् ।
१५ कृतक ।
१६ शालादि ।
१७ तेषु सर्वसाधारणत्वात् ।
१८ अक्षराणाम् ।
१९ शरीरविन्यासकल्पितया संज्ञया ।
२० कृत्यपक्षमुद्दिश्य ।
२१ मंत्र्यादीनाम् ।
२२ चारचक्षुः ।
२३ सप्रशंसम् ।
२४ अधिके न्यूने वा प्रकृतिप्रमाणे कथिते कार्यसिद्धिं यदि पश्यति तथा ब्रूयात् ।
२५ उपरोधकारणान्युद्भावयेत् ।

1 J मन्येत् । 2 svl रागोप° । 3 SJG 'सिद्ध' नास्ति । 4 SJG याचक । 5 svl GVl विचित्र । 6 SJG परिमाणं । 7 SJG 'ब्रूयात्' नास्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किं[१] भर्तुर्मे व्यसन[२]मासन्नं [२७द्वि.] पश्यति[1]। स्वं वा व्यसनं[३] प्रतिकर्तुकामः पार्ष्णि[2]ग्राह[४]मासार[५]मन्तः[3]को[६]पमाटविकं[७] वा[4] समुत्थापयितुकामो मित्रं वा व्या[5]घातयितुकामः। स्वं[९] वा परतो[१०] विग्र[११]हमाटविकं[6] वा प्रतिकर्तुकामः। संसिद्धं मे भर्तुर्यात्राकालमभिहंतुकामः। सस्य[१२]पण्य[7]कुप्य[१३]सङ्ग्रहं दुर्ग[१४]कर्म बल[१५]समुदानं[8] वा कर्तुकामः। स्वसैन्यानां वा व्यायामस्य[9] देश[१६]कालावकाङ्क्षमाणः। परि[१७]भव[10]प्रमादा[१८]भ्यां वा संसर्गा[१९]नुबन्धार्थी[२०] वा मामुपरुणद्धीति ज्ञात्वा वसे[२१]दपसरे[२२]द्वा। प्रयोजन[२३]मिष्ट[२४]मुपेक्षेत[11] शासन[12]मनिष्टमुक्त्वा वा वधबन्ध[13]भयाद्। अविसृष्टो[14]ऽप्यपगच्छेत्[15][२५] अन्यथा[२६] नियम्येत्[16][२७]।

---

१ तद्यथा—किं भर्तुरित्यादि। २ दैवं मानुषं वा।
३ तद्विधमेव। ४ यात्राविधानाय।
५ पार्ष्णिग्राहमित्रं वा तत्साहाय्यदानाय।
६ अस्मद्भर्तुर्युवराजादिकम्।
७ प्रचंडम्।
८ मित्रमिति अस्मद्भर्तुरन्तर्गतं आक्रंदं वा मित्रमित्रम्।
९ अयं शत्रुः स्वकीयं वा। १० अन्यतः।
११ अंतःकोपादिकम्।
१२ स्नेहक्षारलवणादि।
१३ काष्ठतृणलोहादि।
१४ भग्नस्फुटितसंस्कारम्।
१५ विक्षिप्तानि बलान्येकत्र कर्तुकामः।
१६ युद्धार्थभवानुकूलः।
१७ कोयं कस्यायं येन संप्रेषयामि।
१८ इन्द्रियार्थप्रसक्तिः प्रमादस्ताभ्याम्।
१९ संसर्गो यौनः संबंधः। यतो द्वयोश्चित्तसंश्लेषः।
२० तेनानुबंध उभयसंततिसंबंधस्तदर्थी।
२१ कृत्यपक्षोपग्रहादिके ज्ञात्वा स्वस्योपरोधं वसेत्।
२२ दूषणप्रतिकारात्।
२३ *
२४ उपलब्धस्य चारस्य शासनैः।
२५ यदि स्वाभिहितं कार्यं पश्येत् संसर्गानुबंधार्थित्वं परिभवप्रमादाभ्यामुपरोधि यदि स्वस्वामिनः कालयापनमनुकूलमुक्तकारणैः प्रतिकूलं शत्रोस्तदा.........
२६ अनपसरणे।
२७ वधबंध.........।

---

1 SJG पश्यन्। 2 SJG °ग्राहासार°। 3 SJG °सारावरावन्तःकोप°। 4 SJGvl °आक्रन्दाभ्यां वा; G आक्रन्दं वा। 5 SJG व्यापाद°। 6 SJG °मन्तःकोपमाटविकं। 7 SJG कुप्यपण्य। 8 SJG समुत्थान°; svl °द्धा°; Gvl °द्दा°। 9 SJG व्यायामदेश। 10 G प्रमदा°। 11 S °मपेक्षेत वा; svl JG °मवेक्षेत वा। 12 SJG वा शासन°। 13 SJG बंधवध; Jvl बंधुवध। 14 S °दपि विसृष्टो; svl °दविसृष्टो। 15 SJ व्यपगच्छेद°। 16 svl नियम्यते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१]प्रेषणं [२]सन्धिपालत्वं [३]प्रतापो [४]मित्रसङ्ग्रहः ।
[५]उपजापः सुहृद्भेदो [६]गूढ[1]दण्डातिसा[७]रणम् ॥
बन्धुरत्ना[९]पहरणं[१०] चारज्ञा[११]नपराक्रमः[१२] ।
[१३]समाधिमोक्षो दूतस्य[१४] कर्मयोगस्य चाश्रयः[१५] ॥
स्वदूतैः कारये[१६]देतत्पर[१७]दूतांश्च [२८ प्र.] रक्षयेत् ।
[2]प्रति[१८]दूतावसर्पाभ्यां दृश्यादृश्यैश्च [१९]रक्षिभिः ॥
इति विनयाधिकारिके षोडशोऽध्यायः[3] ॥

*

[राजपुत्ररक्षणम् ।]

रक्षितो राजा राज्यं[२०] रक्षत्यासन्नेभ्यः[२१] [4]परेभ्यश्च[२२] । पूर्वं[२३] दारेभ्यः[२४] पुत्रेभ्यश्च ।

१ दूतकर्मोक्तानुक्तं वार्तिकश्लोकैराह ।
२ *
३ *
४ *
५ *
६ *
७ गूढानां पुरुषाणां दंडस्य चतुरंगबलस्य गूढं अतिसारणम् । अन्यापदेशैश्चित्रकूटे कर्पासगोण्यंतर्गतदंडस्येव ।
८ शत्रुबंधः ।
९ *
१० *
११ परमंडलवृत्तांतः ।
१२ परेषां सारबलादिवधादाक्रमणम् ।
१३ *
१४ तदेतत् ।
१५ *
१६ *
१७ *
१८ दूते अन्वागते यः संप्रेष्यते स प्रतिदूतः । अवसर्पो गूढ........ ।
१९ दृश्या रक्षिणो विजिगीषुनियुक्ताश्चोरादिरक्षणार्थम् । अदृश्याः कुड्यांतर्हिता गूढपुरुषा........ ।
२० राज्ञो राज्यं स्यात् परिरक्षितम् । तदभावे हि संकीर्णं जगत् स्यादधरोत्तरम् ।
२१ आसन्नशब्दस्तरतमपर्यंतो ग्राह्यः । तेनासन्ना मंत्र्यादयः । आसन्नतराः पुत्रभ्रात्रादयः । आसन्नतमाः दाराः । तेभ्यो रक्षितः ।
२२ परेभ्यश्चेति । सामंताटविकादिद्विपदचतुष्पदस्थावरजंगमेभ्यश्च ।
२३ अरिभयादासन्नेभ्यो रक्षा प्रागभिधेयेत्याह पूर्वं दा० ।
२४ आसन्नतमेभ्यः ।

1 G दण्डगूढ । 2 SJG दूतापसर्पा° । 3 S दूतप्रणिधिः षोडशो°; J प्रथमेऽधिकरणे दूत° षोडशो; G प्रथमाधिकरणे षोडशो° दूत° । 4 svl Gvl छात्रेभ्यश्च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दाररक्षणं[१][1] तु निशान्तप्रणिधौ वक्ष्यामः ।

पुत्ररक्षणं तु जन्मप्रभृति[२] राजा[2] पुत्रान् रक्षेदिति[3] सिद्धान्तः । जन्मप्र[३]भृति[४] राजपुत्रान्[५] रक्षेत् । कर्कटक[६]सधर्माणो हि जनक[७]भक्षा राजपुत्राः ।

तेषामजातस्नेहे[८] पितर्युपांशुदण्डः श्रेयानिति भारद्वाजः ।

नृशंस[९]मदुष्ट[4]वधः[१०] क्षत्रबीज[5]विनाशश्चेति विशालाक्षः । तस्मादेकस्थाना[११]वरोधश्श्रेयानिति ।

अहिभय[१२]मेतदिति परासराः[6] । कुमारो हि विक्रमभयान्मां पितावरुणद्धीति[7][१३] ज्ञात्वा तदेवाङ्के[8][१४] कुर्यात् तस्मादन्तपालदुर्गे वासः श्रेयानिति[१५] ।

औरभ्रं[१६][9] भयमेतदिति पिशुनः । प्रत्यापत्तेर्हि तदेव कारणं ज्ञात्वाऽन्तपालसखः स्यात्[१७] [२८ द्वि.] तस्मात् स्वविषयादपकृष्टे[१८] सामन्तदुर्गे वासः श्रेयान्[10] ।

---

१ तथापि विशेषः ।

२ जन्म च द्विविधमिष्यते । आधानं सूतिश्चेति । आधानात्प्रभृति राजा कौटि(ट)ल्येनेष्यते । प्रसूतितो भारद्वाजादिभिः ।

३ तत्र भारद्वाजमतमाह ।

४ प्रसूतेः प्रभृतिः ।

५ *

६ अत्र हेतुमाह ।

७ यथा ते पितरि नापकुर्वंति । यतो मातृबांधवास्तं प्रतिगृह्यापकुर्वंति । ततस्तद्द्वारेणाप्यपकरोति ।

८ यावत्स्नेहः पितुर्नोत्पद्यते तावदेवोपांशुदंडस्तेषां कर्तव्यः ।

९ यदेवं राजपुत्ररक्षणं नृशंसं कर्म्मैतत् ।

१० अदुष्टवधश्चात्र निषिद्धः ।

११ एकस्मिन्नेव स्थाने यत्र पिता तत्रैवावरोधः । स्वातंत्र्यनिरोधदुष्टसंसर्गादितिरोध........

१२ अहिनेवैकस्थाने सता यथा भयं तथा सर्पसमानेन च्छिद्रान्वेषिणा पुत्रेणेति पाराशराः ।

१३ अबुद्धमपि बुद्ध्वा ।

१४ तदेवाहिभयं विनाशलक्षणं अंके समीपे स्थितः कुर्यात् ।

१५ विषयांतपालनार्थं,........दंडनायकदुर्गे वासस्तेनैवारक्षकेण कुमारस्य श्रेयान् । अरिभयादिति भावः ।

१६ उरभ्रो मेषस्तस्येदमौरभ्रम् । यथाऽपसृतान्मेषाद्भयं तथा तस्मादपि ।

१७ आसमंतादापतनमापत्तिः प्रतिविपरीता या आपत्तिः प्रत्यापत्तिः । पितुः सकाशादन्यत्र गमनमित्यर्थः । तस्याः प्रत्यापत्तेर्व्यवहितस्थापनस्य तदेव पूर्वोक्तं विक्रमभयं कारणभूतं ज्ञात्वा । [पाश्चात्यपत्रे* ।]

१८ दूरांतरिते । उरभ्रोऽपि दूरायातः प्रहर्तुमसमर्थो भवतीति भावः ।

---

1 SJG 'तु' नास्ति । 2 SJG राज । 3 SJG '°दिति सिद्धान्तः । जन्मप्रभृति राजपुत्रान् रक्षेत्' इति नास्ति । 4 SJG °मदृष्टवधः; SVl °मदृष्टं वधः । 5 G 'बीज' नास्ति । 6 SJG पाराशराः । 7 SJG रुणद्धि । 8 SJG तमेवाङ्के । 9 SJG °भ्रकं; SVl °भ्रगं । 10 SJG 'श्रेयानिति' ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वत्सस्थानमेतदिति कौणपदन्तः। वत्सेनेव[१] हि धेनुं पितरमस्य सामन्तो दुह्यात्। तस्मान्मातृबन्धुषु[२] वासः श्रेयान्[1]।

ध्वजस्थानमेतदिति वातव्याधिः। तेन[३] हि ध्वजेनादिति[४]कौशिकवदस्य[५] मातृबान्धवा भिक्षेरन्[2]। ग्राम्यं[3][६]सुखेष्वेन[७]मवसृजेत्[4]। सुखोपरुद्धा राजपुत्राः[5] पितरं नाभिद्रुह्यन्तीति।

जीवन्मरणमेतदिति कौटल्यः। काष्ठमिव घुंणजग्धं[6] राजकुलमविनीतपुत्रमभियुक्तमात्रं भज्येत। तस्मादृतुमत्यां महिष्यां ऋत्वि[२९ प्र.]जश्च[९]रुमैन्द्रा[7]बार्हस्पत्यं[१०][८] निर्वपेयुः। आपन्नसत्त्वायाः[8] कौमारभृत्ये[9] गर्भकर्मणि[११] प्रसवे[10][१२] च वियतेत। प्रजातायाः[१३] पुत्रसंस्कारं[१४] पुरोहितः कुर्यात्। समर्थं[१५] तद्विदो[१६] विनयेयुः।

---

१ तेन च पुष्टो भूत्वा कुमारसहायोऽभियुंज्यादिति भावः।
२ मातुलादिषु। ते ह्यस्य पितरं स्वापत्यवैधव्यभयान्नातिद्रुह्यन्तीति भावः।
३ तदेव व्याचक्षते। तेन ध्वजेन कुमारेण।
४ ध्वजचिन्हं नागराजादीनां तत्स्थानसमानमेतत्।
५ अदितिग्रहणमदितिपुत्राणां कालादिदेवानां परिग्रहार्थम्। कौशिकस्त्वाहितुंडिकः कोशेन सर्पग्रहेण चरतीति। अदितिवद्देवध्वजं दर्शयित्वा। तद्यथा। पणमहेत्यादिः कौशिको भिक्षते। योऽस्य नागस्य पूजा करोति तस्य सकुलस्य कुशलमकुशलमन्येषामिति निग्रहभयमनुग्रहाशां च.........कृतीः कर्षयित्वा तेनोपचयं कृत्वा मातृबांधवा अभिद्रुह्यंतीति भावः।
६ ग्राम्यशब्देन शब्दस्पर्शरूपरसगंधाभिधाना विषया ग्राह्याः। ग्रामाणां साधूनि ग्राम्याणि विषयसुखानीत्यर्थः।
७ निरंकुशमिति शेषः।
८ परेणेति शेषः।
९ अनागतमेव कृतकोष्ठशुध्यां शालिघृतक्षीरपथ्याहारायां राज्यां ऋत्विजः।
१० इन्द्रो बृहस्पतिश्च देवता अस्येति।
११ कुमारभृतये साधु कौमरभृत्यं बालवैद्यं हिरण्याक्षीयं जीवकीयं वा यो वेत्ति स बालवैद्यो गर्भकर्मणि गर्भ.........
१२ प्रसवे सुखप्रसूतौ च यत्नं कुर्यात्। एतेन राजपुत्ररक्षा भवति। तथा चोक्तं—

.........ध्वथ योनौ च गर्भे कर्मणि चापि यः।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः॥

१३ प्रसूतायाः।
१४ जातकर्मादिभिः।
१५ अध्येतुं योग्यम्।
१६ लिपिसंख्यानादिसकलराजविद्याविदः।

---

1 SJG श्रेयानिति। 2 SJG भिक्षेरन्। 3 SJG तस्मात् ग्राम्यधर्मे ष्वेनं°। 4 SJG °सृजेयुः। 5 SJG हि पुत्राः। 6 SJG हि घुण°। 7 J °इन्द्र। 8 SJG सत्वायां। SJG9 °भर्मणि। 10 SJ प्रजनने; SVl GVl प्रसवने; G प्रजने।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१]सत्त्रिणामेकश्चैनं मृगयाद्यूतमद्यस्त्रीभिः प्रलोभयेत्। पितरि विक्रम्य राज्यं गृहाणेति[२]। तम[1]न्यः सत्त्री प्रतिषेधयेदित्यांभीयाः[2]।

महादोषमबुद्ध[३]बोधनमिति कौटल्यः। नवं हि द्रव्यं येन येनार्थजा-[४]तेनोपदिह्यते तत्तदा[५]चूषति[3]। तस्माद्ध[६]र्म्य[4]मर्थं चास्योपदिशेत् नाध[5]र्म्यम-[6]नर्थ्यं[७] च। सत्त्रिणस्[7]त्वेनं तव स्मः इति वदन्तः पालयेयुः[८]।

यौवनोत्सेकात् परस्त्रीषु [२९ द्वि.] मनः कुर्वाणमार्या[९]व्यञ्जनाभि[१०]रमेध्या[8][११]-[9]भिः शून्यागारेषु रात्रावुद्वे[१२]जयेयुः।

मद्यकामं योग[१३]पानेनोद्वेजयेयुः।

द्यूतकामं [१४]कापटिकै[10]रुद्वेजयेयुः[१५]।

मृगयाकामं प्रतिरोधकव्यञ्जनैस्त्रासयेयुः।

पितरि विक्रमबुद्धिं तथेत्यनुप्रविश्य भेद[१६]येयुः।

---

१ विद्याभिर्विनयसंपन्नो नवेति कुमारचित्तपरीक्षणार्थं आचार्यमतमाह।

२ उक्तं च—अच्छित्वा परमर्माणि अकृत्वा कर्म दुष्करम्।
अहत्वा शत्रुवृंदानि महतीं नाप्नुयाच्छ्रियम्॥

३ उक्तं च—दोषान् दोषा इति ज्ञात्वा कालेनापि विरंस्यति।
काभूपपतिर्विरतेस्तद्गुणग्रहमानिनः॥

४ निंबकल्कगोमूत्रकर्पूरादिना।

५ तन्मयं भवति।

६ न्यायेनार्थार्जनादि।

७ नाधर्म्यमित्यर्थापन्नेऽपि पुनरुच्यतेऽत्यंतनिरोधार्थम्।

८ अनर्थेभ्य रक्षयेयुः।

९ तथेत्यनुप्रविश्य।

१० घटदासीभिः कृतकधृतकुलस्त्रीवेषाभिः।

११ अकृतशरीरसंस्काराभिर्निंबपलाण्डुभक्षणावलेपनादिभिर्दुर्गंधाभिः।

१२ तत्पतिपुरुषागमनैः।

१३ मदनीयविरेचनीयौषधयुक्तपानेन।

१४ पूर्वोक्तगूढपुरुषैर्धूर्ताभिश्चैर्वाक्पारुष्यदंडपारुष्याभ्याम्।

१५ उद्वेजनशब्दस्यावृत्तिरतिशयख्यापनार्थम्।

१६ अनुप्रविश्य इति चित्तमूक्तं च—यस्य यस्य हि यो भावस्तस्य तस्य हितं नरः।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्॥
पश्चात् भेदयेयुर्जाताशंकं कुर्युः।

---

1 SJG तदन्यः। 2 svl त्याजीयः; Jvl त्याजयिः; Gvl त्याजीम्भी। 3 SJG मुद्रितेषु पुस्तकेषु °चूषतीत्यनन्तरं 'एवमयं नवबुद्धिर्यदुच्यते (G °च्येत) तत्तच्छास्त्रोपदेशमिवाभिजानाति' इति पठ्यते। 4 SJG तस्माद्धर्मं°। 5 SJG °धर्मं°। 6 SJG मनर्थं। 7 svl Gvl श्चैनं। 8 SJG स्त्रीभिरमेध्या°। 9 svl Gvl Jvl °रसेव्याभिः। 10 SJG पुरुषैरुद्वेजयेयुः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अ[१]प्रार्थनीयोऽयं[1] राजा विपन्ने[२] घातसम्पन्ने नरकपातः संक्रोशः[३] प्रजा[४]भिरेकलोष्ट[५]वधश्चेति वि[६]रागं वे[२]दयेयुः । [३० प्र.] प्रियमेकपुत्रं[७] बध्नी[3]यात् । बहुपुत्रः प्रत्यन्त[८]मन्यवि[९]षयं वा प्रेषयेत् यत्र गर्भः[१०] [4]पण्यं[११] डिंबो[5] वा[१२] न भवेत् ।

आत्मसम्पन्नं से(सै)[6]नापत्ये यौवराज्ये वा स्थापयेत् ।

[१३]बुद्धिमानाहार्यबुद्धिर्दुर्बुद्धिरिति पुत्रविशेषाः ।

शिष्य[१४]माणौ[7] धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान् ।

उपलभमानो नानुतिष्ठत्या[१५]हार्यबुद्धिः ।

अपायनि[१६]त्यो धर्मार्थद्वेषी[१७] चेति दुर्बुद्धिः ।

स यद्येकपुत्रः पुत्रोत्प[३० द्वि.]त्तावस्य प्रयतेत[8] । पुत्रि[१८]कापुत्रानुत्पादयेद्वा ।

[१९]वृद्धस्तु व्याधितो वा राजा मातृबन्धु[२०]कुल्य[9]गुण[२१]वत्[२२]सामन्तानामन्यत-

१ भेदप्रकारमाह ।

२ स्वपिता बलपौरुषसंपन्नत्वात्सुरक्षत्वाच्च योद्धुमशक्यः । रक्षाशैथिल्येऽपि नैकांतिकी सिद्धिर्यतो विपन्नेऽस्मिस्त्वत्फलीभूते घातोऽस्माकं नाशः ।

३ शरीरसंजननसंवर्धनरक्षणैः पितुः परमोपकारित्वात् संक्रोशः ।

४ अनुरक्तप्रकृतिश्चायं राजा ततश्च प्र० ।

५ पितृघात्ययमिति ।

६ अथैवमुक्तोऽपि जन्मांतरवैरानुबंधान्निवर्त्तेत । तदा विरागं राज्ञे ।

७ निगडैरिति शेषः । अन्यत्रगमनाशंकायाम् ।

८ आटविकविषयम् ।

९ परस्य राष्ट्रं मित्रादिविषयम् ।

१० गर्भ इव गर्भः पुत्रत्वेन जामातृत्वेन वा न तैर्गृह्यते तं प्रदर्श्य न विकुर्वंते ।

११ पण्यवत्पण्यं कृत्वा वा पितृप्रकृतीर्भिक्षित्वा शक्तिमात्मनः पूरयंति ।

१२ डमरो डमरकारको यत्र न भवति तं विषयं प्रेषयेत् ।

१३ बुद्धिवशादेव त्रैविध्यं राजपुत्राणां दर्शयन्नाह । अष्टगुणबुद्धिसंपन्नः ।

१४ प्रथमस्य लक्षणमाह । गुरुभिरुपदिश्यमानौ ।

१५ आचार्यादिभिः प्रतिक्षणमाहार्या बुद्धिर्यस्य । तत्प्रेरणयाऽनुष्ठाने प्रवृत्तः इत्यर्थः । तं प्रयत्नेन शिक्षयेत ।

१६ अपायहेतुषु कामादिव्यसनेषु नित्यप्रवृत्तः ।

१७ धर्मद्वेषी नास्तिकत्वात् । अर्थद्वेषी दैवपरत्वात् ।

१८ तस्य राज्यायोग्यत्वात् । दुर्बुद्धिनोत्पन्नो दुर्बुद्धिरेव स्यादित्याशंकायाम्—पुत्रिकेत्याद्याह । पुत्रत्वेन गृहीतानां दुहितॄणां ब्राह्मणैः क्षत्रियैर्वा पुत्रा० तत्तुल्यः पुत्रिकापुत्र इति वचनात् ।

१९ क्षीणशुक्रः ।

२० क्षेत्रभूताया देव्या ज्ञातिः ।

२१ राज्ञः कुलोत्पन्नः ।

२२ प्रशस्तगुणवदिति संबध्यते ।

1 SJG 'यं' नास्ति । 2 SJG 'वेदयेयुः' नास्ति । 3 SJG वा बध्नीयात् । 4 SJvl पण्डयं; Svl पण्यं; J पण्डो । 5 S डिमबो; Svl डिम्बो; Jvl पण्यबिम्बो । 6 SJG सैनापत्ये । 7 SJG शिष्यमाणो । 8 G वियतेत । 9 S तुल्य; Svl कुल्य ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेन क्षेत्रे[१] बीजं[२]मुत्पादयेत् । न चैक[३]पुत्रमविनीतं[3] राज्ये स्थापयेत् ।

बहूनां[४]मेकसंरोधः पिता पुत्र[५]हितो भवेत् ।
अन्यत्रा[६]पद ऐश्वर्यं[७] ज्येष्ठभागि[1] तु पूज्यते ॥
कुल[८]स्य वा भवेद्राज्यं कुलसङ्घो[९] हि दुर्जयः ।
अराजव्यसं[१०]नाबाधः शश्वदाव[११]सति क्षितिम् ॥

॥ इति विनयाधिकारिके सप्तदशमोऽध्यायः[2] ॥ छ ॥

*

[अपरुद्धवृत्तम् ।]

विनीतो[3] राजपुत्रः कृच्छ्र[१२]वृत्तिरसदृशे कर्मणि नियुक्तः पितरमनु[१३]वर्तेत अन्यत्र प्राणा[१४]बाधं[4]प्रकृतिकोप[5]पातकेभ्यः ।

पुण्ये[१५] कर्मणि[6] नियुक्तः पुरुषमधि[१६]ष्ठातारं याचेत । पुरुषाधिष्ठितस्तु[7] सविशेष[१७]मादेशमनुतिष्ठेत् । अभि[८]रूपं च कर्मफलमौप[१८]यनिकं च लाभं पितुरुपना[१९]ययेत् ।

१ देव्याम् ।
२ राजार्हम् ।
३ आहार्यबुद्धिमपि स्थापयेत् । बुद्धिमतोऽभावे दुर्बुद्धिमेकं न स्थापयेत् । अविनीतस्तु सर्वव्यसनास्पदत्वाद्राज्यमात्मानं च नाशयति ।
४ विरक्तानाम् ।
५ पितुर्हितत्वेऽहिभयाभावात् भिन्नमतत्वात् बहूनां पुत्राणामपि हितो भवेत् । परस्परं संघर्षेण विनयग्रहणात् ।
६ यदि कुष्ठव्याध्यादिका आपद्भवति तदा कनिष्ठभाग्यपि भवति । राज्यं पूज्यते न्याय्यत्वात् ।
७ ज्येष्ठस्य भवतीत्यर्थः ।
८ कुलस्येति बहूनामित्यर्थः । सौभ्रातृत्वे सति रामयुधिष्ठिरादीनामिव राज्यं भवेत् ।
९ भिन्नकुलानामपि ।
१० *
११ *
१२ *
१३ *
१४ यत्र स्वल्पबलो बलीयसि प्रेष्यते विनाशः संपद्यतामिति ।
१५ न्याय्ये समाहर्तृत्वादौ परीक्षार्थम् ।
१६ *
१७ आदिष्टादधिकैः फलैः सहितम् ।
१८ *
१९ *

1 S भागी तु; J भागस्तु; Jvl भागिति । 2 S राजपुत्ररक्षणं सप्तदशोऽध्यायः; J प्रथमेऽधिकरणे राज° सप्त°; G प्रथमाधिकरणे सप्त° राज° । 3 SJG 'विनीतो' नास्ति । 4 SJG बाधक । 5 Svl J कोपक । 6 SJG पुण्यकर्मणि । 7 SJG श्च । 8 Svl Gvl अविरुद्धं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथाऽ[१]प्यतु[२]ष्यंतमन्यस्मिन् पुत्रे [३१ प्र.] दारेषु वा स्निह्यंतं तदनुरोधाद्वा द्वेषे[1]णारण्या[३]यापृच्छेत ।

वध[1]बन्धभयाद्वा यस्सामन्तो न्यायवृत्तिर्धार्मिकः सत्यवागविसंवादकः प्रति[2]ग्रहीता मानयिता चाभिपन्नानां तमाश्रयेत्[3] ।

तत्रस्थः कोश[4]दंडसंपन्नः प्रवीरपुरुषकन्या[४]संबंधम[टवीसम्बन्धं] कृत्यपक्षोप[5]ग्रहं च[6] कुर्यात् ।

एकचरः सु[7]वर्णपाकमणिरागरस[8]रूप्य[६]पण्याकरकर्मान्तानाजीवेत् । पाषं[७]ण्डसङ्घद्रव्यमश्रोत्रियोऽपर[9]भोग्यं वा देव[10]द्रव्यमाढ्यविधवां[11] गूढमनुप्रविश्य सार्थयानपा[12]त्राणि च मर्दनरसयोगेनातिसंधाय तद् द्रव्यमप[13]हरेत् ।

पारिग्राहिकं[14] वा [९]योगमातिष्ठेत् । मातुः परिजनोपग्रहेण वा [१०]चेष्टेत ।

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपाषंड[15]छद्मभिर्वा नष्ट[११]रूपस्तद्व्यञ्जनस[१२]खः [16]छिद्रेषु[१३] प्रविश्य राज्ञः शस्त्ररसाभ्यां प्रहृत्य ब्रू[१४]यादहमसौ कुमारः सहभोग्यमिदं [३१ द्वि.] राज्यमेको नार्हति भोक्तुं ये[17] कामयंते मां[18] [१५]भर्तुस्ता[19]नहं द्विगुणेन भक्तवेतनेनोपस्थास्यामी[20]त्य[21]परुद्धवृत्तम् ।

॥ इति विनयाधिकारिकेऽपरुद्धवृत्तं प्रकरणं[22] ॥ छ ॥

१ स्वभावद्वेषात् ।
२ अन्यपुत्रदारानुरोधाद्वा अतुष्यंतम् ।
३ अरण्यं तपसे यास्यामीति ।
४ *
५ *
६ *
७ धर्मविजयिनः कुमारस्य कोशोपार्जनोपायमुक्त्वा लोभविजय(यि)नः प्रोच्यते ।
८ वक्ष्यमाणमदनीयमोहनीययोगैर्वैदेहकव्यंजनहस्तेन धनपतीनतिसंधायापहरेत् तेषां धनमित्यर्थः ।
९ दुर्गलंभोपायाभिहितप्रयोगैरुपजापादिभिर्दुर्गसंस्थं द्रव्यमपहरेदित्यर्थः ।
१० आत्मनः शक्त्युपचयं कुर्यात् ।
११ प्रच्छादितपूर्ववर्णवेषादि । वटकषायस्नातः सहचरकल्कदिग्धः कृष्णो भवतीत्यादिप्रयोगैः ।
१२ कार्वादिव्यंजनानां सखा भूत्वा ।
१३ रक्षाशैथिल्येषु ।
१४ एकलोष्टवधप्रतिषेधार्थम् ।
१५ *

1 SJG बन्धवध । 2 S प्रतिगृहीता । 3 SJG °माश्रयेत । 4 S कोदण्ड; SVL कोशदण्ड । 5 S °गृहं । 6 SJG वा । 7 SVL सुपर्ण । 8 SJG हेम । 9 SJG श्रोत्रियभोग्यं । 10 G देश । 11 SJ वा गूढं; G विधवाद्रव्यं वा । 12 S पात्रणि । 13 SJ सन्धायापहरेत्; G °वहरेत् । 14 SJG पारग्रामिकं । 15 G पाषण्डच्छद्मं । 16 SJG छिद्रे । 17 SJG तत्र ये । 18 SJG 'मां' नास्ति । 19 S भर्तुं (SVL भर्तुं) नाहं (SVL तानहं); J भर्तुं नाहं; G भर्तुं तानहं । 20 SJG नोपस्थास्ये इति । 21 SJG इत्यवरुद्ध । 22 SJG 'इति...प्रकरणं' नास्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]अपरुद्धं[१] तु मुख्यपुत्रा[2][3]वसर्पा[२]: प्रतिपाद्यानयेयुर्माता वा प्रतिगृहीता । [३]त्यक्तं वा[4] गूढपुरुषाः शस्त्ररसाभ्यां हन्युः । अत्यक्तं[४] तुल्यशीलाभिः स्त्रीभिः पानेन मृगयया वा प्रसंज[5]यित्वा रात्रावुपगृह्यानयेयुः ।

उपस्थितं च राज्येन मद[6]दूर्ध्व[५]मिति सांत्वयेत् ।
एकस्थमथ संरुन्ध्यात् पुत्रवां[7]स्तु प्रवासयेत् ॥

॥ इति विनयाधिकारिके अष्टादशोऽध्यायः ॥ छ ॥[8] [३२ प्र.]

*

[राजप्रणिधिः ।]

[६]राजानमुत्थि[9]तं[७]मनूत्तिष्ठंते भृत्याः । प्रमाद्यन्तमनुप्रमाद्यंति । कर्माणि चास्य भक्षयंति द्विषद्भिश्चातिसंधीयते । तस्मादुत्थानमात्मनः कुर्वीत । नालिका[10]भिरहरष्टधा विभज्य[11] रात्रिं च विभजेत्[12] । छायाप्रमाणेन वा ।

१ पूर्वं दुष्टे पितर्यदुष्टस्यापरुद्धस्य वृत्तमभिहितं भविष्यतो राज्ञो रक्षार्थमिदानीं दुष्टेऽपरुद्धे अदुष्टस्य राज्ञो वृत्तिरभिधीयते ।

२ मंत्र्यादिपुत्रास्त एवावसर्पा राज्ञा प्रणिहितत्वात् प्रतिपाद्य वा राज्यमानयेयुः । माता वा तस्य प्रतिग्रहीता राज्ञोपचारैरावर्जिता आनयेत् ।

३ दौष्ट्यावसंधेयम् ।

४ अदुष्टम् ।

५ मत्परोक्षे तवैव राज्यमिति सांत्वयेदनुनयेत् बुद्धिमन्तम् । आहार्यबुद्धिं तु एकस्थं निरुद्धसंचारं संरुध्यात् । दुर्बुद्धिं तु पुत्रवांश्चेदन्यस्मिन् योग्ये पुत्रे सति प्रवासयेद् उपांशुवधेन हन्यात् । राज्यरक्षार्थं सावद्यलेशो बहुपुण्यराशिरिति वचनात् ।

६ आसन्नतरेभ्यः पुत्रेभ्यो रक्षणमभिधायासन्नेभ्यो मंत्र्यादिभ्यो रक्षाप्रकारमाह ।

७ राजानमुत्थितं स्वव्यापारे सततोद्युक्तं अनूत्तिष्ठन्ते अनंतरमेवोत्तिष्ठंते स्वव्यापारेषु सततोद्युक्ता भवंति । स यच्छीलस्तच्छीलाः प्रकृतय इति वचनात् । उक्तं च–

यत्किंचित्कुरुते राजा शुभं वा यदि वाऽशुभम् ।
भृत्यास्तदनुकुर्वंति नर्तक्यो नर्तकं य [था] ॥

......च भृत्येषु राज्ञो रक्षा संपद्यते । स्वयमुद्यूक्तो राजा न स्वैः परैश्चातिसंधीयते । एवं स्वतोऽपि रक्षा । प्रमाद्यंत इंद्रियार्थेषु प्रसज्यंतमनुप्रमाद्यंति । उक्तं च–

राजानूत्थीयंते न स्वैः स्वयं कार्येष्वनुत्थितः ।
न ह्युद्योगोऽस्ति गात्राणामनुद्युक्तेन्तरात्मनीति ॥

ततश्च रक्षाशैथिल्यं भवतीति भावः । दोषांतरं च दर्शयति । कर्माणि च । उपचारात्तस्माहर्त्तारः कर्मणां फलानि चास्य भक्षयंति । राज्ञो निरवधानत्वात् । भक्षितवामने च कृत्याः परेषां भक्षयन्ति ततश्च प्रमादः । अत एव द्विषद्भिश्चातिसंधीयते । तस्मादुत्थानमुद्योगमात्मरक्षार्थं कुर्वीत । अनुष्ठानानां कालविभागार्थमाह ।

1 SJG अवरुद्धं । 2 SJ पुत्र । 3 SJG °मपसर्पाः । 4 SJG 'वा' नास्ति । 5 SJG प्रसज्य रात्रा° । 6 J ममोर्ध्वमिति । 7 SJG वा । 8 S अवरुद्धवृत्तमवरुद्धे च वृत्तिः अष्टा°; J प्रथमेऽधिकरणेऽवरुद्ध° अष्टा°; G प्रथमाधिकरणे अष्टा° अवरुद्ध° । 9 SJG °नमुतिष्ठमानम्; SVl नमुत्थित° । 10 S नाळिका; J नाडिका; G नालिका । 11 SJG 'विभज्य' नास्ति । 12 J विभजेत ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रिपौरुषी पौरुषी चतुरंगुला नष्ट[1]च्छायो[2] मध्याह्न इति चत्वारः[3] पूर्वे-दिवसस्याष्टभागाः ।

{छायापौरुषाभिधानस्य द्वादशांगुलशंकोस्तत्प्रमाणेन वा दिनविभाग-स्तदेवाह त्रिपौरुषीति । आदित्योदये षण्णवत्यंगुला पौरुषच्छाया भवति । सा यदि त्रिपौरुषी षड्त्रिंशदंगु[३२ द्वि.]लावशिष्यते । तदा पूर्वो दिवसस्याष्टभागो व्यतीतो भवति । यदा पौरुषी द्वादशांगुला तदा द्वितीयोऽष्टभागः । यदा चतुरंगुला तदा तृतीयोऽष्टभागः । यदा शंकुमूलप्रविष्टा च्छाया भवति तदा चतुर्थोऽष्टभागः । नष्टच्छायो मध्यान्ह इति चत्वारः पूर्वेदिवसस्याष्टभागाः ॥ अतिदेशमाह ॥ छ ॥}

तैः पश्चिमा व्याख्याताः । तत्र[1] पूर्वेदिवसस्याष्टभागे रक्षा[2]विधानमाय-[3]व्ययौ च शृणुयात् । द्वितीये पौरजानपदानां कार्या[4]णि पश्येत् । तृतीये स्ना[5]नभोजनं[6] सेवेत[5] । चतुर्थे हिरण्यप्रतिग्र[6]हं[7]म[३३ प्र.]ध्यक्षांश्च कुर्वीत । पञ्चमे मन्त्रिपर्षदा[7] पत्रसंप्रेषणेन मंत्रयेत्[8], चारगुह्यबोधनीयानि बुद्ध्येत[9] । षष्ठे स्वैरविहारं[9] मंत्रं[10] वा सेवेत । सप्तमे हस्त्यश्वरथा[11]युधीयान् पश्येत् । अष्टमे सेनापतिसखो वि[12]क्रमं चिन्तयेत् ।

१ विभक्ताहोरात्रे ।

२ नागरिकवदेष्टृसमाहर्त्रंतपालादिभिः प्रजानां रक्षाविधानं दैवमानुषपीडादि ।

३ अध्यक्षातिसंधाननिवारणार्थम् ।

४ धर्मस्थीयकंटकशोधनोक्तविधिना व्यवहारान् ।

५ व्यायामोपलक्षणार्थम् ।

६ देवपित्रतिथिपूजोपलक्षणार्थम् ।

७ समाहर्त्रादिसमानीतहिरण्यस्य स्वस्थचित्तत्वात् कुर्वीत । स्वयं दृष्टस्य न परिवर्तनादि संभवतीति । अध्यक्षबुद्धिक्षूणे दृष्टेऽन्यान् कुर्वीत ।

८ संज्ञाभिः ।

९ न तैः सुखं स्यादिति गीतनृत्तादिनिमित्तं विह......... ।

१० सति कार्योत्थाने ।

११ स्नानभोजनसंतुष्टान् सारफल्गुविभागार्थम् ।

१२ प्रकाशकूटयुद्धव्यूहरचनादिभिः प्रतिदिनं चिंतितश्च विक्रमः सुश्लिष्टो भवति ।

1 SJG 'नष्ट' नास्ति 2 S °लाऽच्छायो°; SVl °ला च छाया; G °ला च च्छाया । 3 SJ 'चत्वारः' नास्ति; SVl चत्वारः पूर्वे । 4 SJG मुद्रितेषु सर्वेषु पुस्तकेषु, 'छायापौरुषाभिधानस्य' इत्यारभ्य 'अतिदेशमाह' इति पर्यन्तानि वाक्यानि नोपलभ्यन्ते । 5 SJG मुद्रितेषु पुस्तकेषु 'सेवेत' इत्यनन्तरं 'स्वाध्यायं च कुर्वीत' इति पठ्यते । 6 JVl प्रगहं । 7 SJG परिषदा । 8 SJG मंत्रयेत । 9 SJG च बुद्धेत ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिष्ठितेऽहनि[१] सन्ध्यामुपासीत[२] । प्रथमे रात्रिभागे गूढपुरुषान्[३] पश्येत् । द्वितीये स्नानभोजनं[४] सेवेत[1] स्वाध्यायं च कुर्वीत[2] । तृतीये तूर्यघोषेण संविष्टः[५], चतुर्थपञ्चमौ शयीत । षष्ठे रात्रिभागे[3] तूर्यघोषेण प्रतिबुद्धः शास्त्रमितिकर्तव्यतां च चिन्तयेत् । सप्तमे मन्त्रमध्यासीत गूढपुरुषांश्च [३३ द्वि.] प्रेषयेत् । अष्टमे ऋत्विगाचार्यपुरोहित[६][सखः] स्वस्त्ययनानि[७] प्रतिगृह्णीयात् । चिकित्सक[८]महानसिक[4]मौहूर्तिकांश्च[९] पश्येत् । सवत्सां धेनुं वृषभं[5] प्रदक्षिणीकृत्योपस्थानं[१०][११] गच्छेत् ।

आत्मबलानुकूल्येन[१२] वा निशाहर्भागान् प्रविभज्य[6] सेवेत[7] ।

उपस्थानगतः कार्यार्थिनामद्वारासंगं[१३] कारयेत् । दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः[१४][8] कार्यते । तेन प्रकृतिकोपमरिवशं[१५] वा गच्छेत् । तस्मा-

---

१ समाप्ते ।

२ स्मार्तधर्मशिष्टाचारस्य प्रतिपालनार्थम् ।

३ [अ]प्रकाश्यत्वात् ।

४ स्नानं स्वेदाद्यपनोदार्थम् । भोजनं बलाधानार्थम् । उक्तं च–

अजीर्णे भुज्यते यच्च यच्च जीर्णे न भुज्यते ।
रात्रौ न भुज्यते यच्च तेन जीर्यंति मानवा इति ॥

५ शय्यामारूढः । संविष्टः शब्दप्रयोगः कामं सूचयति सुरतप्रकाराणां संवेशनाभिधानात् ।

६ अग्न्यागाराधिकृताः ।

७ आशीर्वादान् अभ्युदयार्थम् ।

८ स्वास्थ्यास्वास्थ्यपरिज्ञानार्थम् ।

९ काल-कायोचिताहारपाकोपदेशार्थम् ।

१० शुभाशुभदिवसग्रहगतिपरिज्ञानार्थम् । आ[दिवा]रात्रकृतपापापनोदा[र्थम्] ।

११ धेनुं ब्राह्मणाय दत्त्वा आस्थानं गच्छेत् ।

१२ आत्मनः शरीरस्य बलमग्निबलाद्भवति । तदानुकूल्येन निशाहर्भागान् प्रविभज्य सेवेत । तत्तृतीयेऽहर्भागे भोजनमभिहितं तस्य बुभुक्षाकाल एवाहर्भागः । तत्र यद्विधेयं तत्तृतीये कुर्यात् । तथा चतुर्थपंचमौ शयीतेत्युक्तं शरीरसात्म्यवशात् न्यूनमधिकं वा कालम् । तथा स्नानभोजने च क्षणानां व्यत्ययो भवतु । निर्दिष्टानुष्ठानान्यनुष्ठेयान्येव । उक्तं च–

स्वस्वकर्मवशात्सर्वं कर्म कुर्वीत पार्थिवः ।
मयोपदेशः कृत्स्नोऽयमात्मार्थं हि विधीयत इति ॥

द्वितीये दिनाष्टविभागे विधेयमेव । प्रजापरिरक्षणार्थमाह ।

१३ पुरुषार्थप्राप्त्यनर्थप्रतीकारादिकार्यार्थिनां प्रवेशनिषेधाभावम् ।

१४ अदंड्यो दंड्यः दंड्यो अदंड्य इति ।

१५ –विरक्ता यांत्यमित्रं वा भर्तारं घ्नंति वा स्वयम् ॥

---

1 SJG कुर्वीत । 2 SJG 'कुर्वीत' नास्ति । 3 SJG 'रात्रिभागे' नास्ति । 4 SJG माहानासिक° । 5 SJG वृषभं च । 6 S JV! G प्रतिविभज्य । 7 SJG कार्याणि सेवते । 8 SVl पर्यानमासमा° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

दे[१]वताश्रमपाषंडश्रोत्रियपशुपुण्यस्था[२]नानां बा[३]लवृद्धव्याधितव्यसन्यनाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत् । कार्यगौ[४]रवादात्यियिक[५]वशेन वा ।

सर्वमात्ययिकं कार्यं श्रुणु[६]र्यान्नातिपातयेत् ।
कृच्छ्रसाध्यमतिक्रान्तमसाध्यं [1]वापि जायते ॥ [३४ प्र.]
अग्न्य[७]गारगतः कार्यं पश्येद्वै[८]द्यतपस्विनाम् ।
पुरोहिताचार्यसंख[९]: प्रत्युत्थायाभिवाद्य च ॥
त[१०]पस्विनां तु कार्याणि त्रैविद्यैस्सह कारयेत् ।
मायायोग[११]विदां चैव न स्वयं कोपका[१२]रणात् ॥
राज्ञो[१३] हि व्रतमुत्थानं यज्ञः कार्यानुशास[१४]नम् ।
दक्षिणा वृत्ति[१५]साम्यं तु[2] दीक्षा त[3]स्याभिषेचनम् ॥

त[4]था चोक्तम्–

न तपोभिर्व्रतैर्यज्ञैः पुण्यमाप्नोति पार्थिवः ।
संरक्षितप्रजाधर्मात्षष्ठमंशं यथाप्नुवन् ॥
प्रजासु[१६]खे सुखं[१७] राज्ञः प्रजानां च हिते[१८] हितम् ।
[१९]नात्मप्रियं हितं राज्ञः प्रजानां हि[5] प्रियं[२०] हितम्[२१] ॥

१ देवद्रव्यादिनिमित्तो विवादः ।
२ तीर्थतडागादीनाम् ।
३ अप्राप्तव्यवहाराणाम् ।
४ देवताकार्यं यद्यल्पा............ ।
५ अत्ययो विनाशो यस्य दृश्यते तदेवादौ पश्येत् ।
६ अनुष्ठानावसानं कुर्यात् ।
७ होमशालास्थितः । अग्निप्रत्यक्षं साक्षिणः प्रष्टव्या इति ।
८ पंडिततपस्विनामादरख्यापनार्थम् ।
९ पुरोहितोपाध्यायानां सखा भूत्वा संशयविच्छेदार्थम् ।
१० तेषामभ्यर्हितत्वात् ।
११ स्तंभमोहादिप्रयोगविदाम् ।
१२ कुपिता मूर्खतपस्विनः शापं प्रयच्छंति ।
१३ *
१४ अन्यायनिवारणम् ।
१५ रिपौ सुतेऽपि वा शास्त्रोक्तदंडधारणात् ।
१६ मात्स्यन्यायप्रतिषेधात् ।
१७ इहलोकसिद्धिलक्षणं राज्ञो भवति ।
१८ स्वधर्मप्रवर्तने तद्धर्मषडंशावाप्तिः ।
१९ मृगयादिव्यसनं हितं राज्ञो उभयलोकविरोधात् ।
२० रक्षानिराकुलत्वम् ।
२१ राज्ञो हितं लोकद्वयसंसिद्धेः ।

1 SG वा विजायते ; J वाभिजायते. । 2 SJG च । 3 SJG दीक्षितस्याभिषेचनम् । 4 SJG मुद्रितेषु पुस्तकेषु 'तथा चोक्तं.........यथाप्नुवन्' नास्ति । 5 SJG तु ।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम्[1] ।
अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः ॥
अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च ।
प्राप्यते फलमुत्थानाल्लभते चार्थसम्पदम् ॥

॥ इति विनयाधिकारिके [२४ द्वि.] एकोनविंशतितमोऽध्यायः ॥ छ ॥ [1]

*

[निशान्तप्रणिधिः ।]

[*निशान्तप्रणिधिः ।] [6]वास्तुकप्रशस्ते देशे सप्राकारपरिषा(खा)द्वारमनेककक्ष्यापरिगतमंतःपुरं कारयेत् ।

कोशगृहविधानेन मध्ये वासगृहम् । गूढभित्तिसञ्चारं मोहनगृहं तन्मध्ये[3] वासगृहं कारयेत् । भूमिगृहमासन्नचैत्यदेवतापिधानद्वारमनेकसुरङ्गासञ्चारं वा [8]तस्योपरि प्रासादं वा गूढभित्तिसोपानं [11]शुषिरस्तम्भप्रवेशा-

१ प्रजानां करणीयार्थशिक्षणम् । २ चतुर्विधस्य ।
३ राज्ञोऽनुद्योगे प्रजाभिः प्राप्तस्यार्थस्य विनाशो भवति ।
४ भविष्यतश्चार्थस्य योगलक्षणं फलं राज्ञा प्राप्यते ।
५ अर्थानां पुष्टत्वम् ।
* निशांतप्रणिधिरिति सूत्रम् । निशाम्यंति निश्चलीभवंत्यत्र राजादयो निशाया अंतो वा यदत्र गम्यते तन्निशांतमंतःपुरम् । तत्र प्रणिधिः प्रणिधानम् । स्थावरजंगमानां तत्र प्रणिधानं सावधानता । राज्ञ आत्मनो दाराणां च रक्षणार्थमिति सूत्रार्थः । संबंधस्तूद्दिष्ट स्पष्टमेव दाररक्षणं निशांतप्रणिधौ प्रवक्ष्याम इति । अत्र दारेभ्यो रक्षणं दाराणां चारक्षणमिति । (इदं सूत्रं मूलभूतपंक्तौ लिखितं नोपलभ्यते । टिप्पणी चेयं पृष्ठपार्श्वभागे लिखिता समुपलभ्यते—सं०)
६ दाराणामात्मनश्च रक्षार्थं गृहरचनां तावदाह – वास्तुका वास्तुविद्याविदस्तैः प्रकर्षेण शस्ते ।
७ वक्ष्यमाणलक्षणं कोशगृहम् । तस्य विधानम् । चतुरस्रां वापीं निरुदकोपस्नेहां स्नानयिंत्वेति सर्वं योज्यम् । तन्मध्ये वासगृहम् । राज्ञो वासाय शय्यागृहम् । गूढभित्तिसंचारमिति–गूढो भित्तिषु संचारो यस्मिंस्तदपकर्तुः प्रविष्टस्य मोहजननत्वात् मोहनगृहम् । तन्मध्ये वा वासगृहं कारयेत् ।
८ भूमिगृहं वा परैरविदितं तद्गोपनार्थं वा प्रकटराजगृहस्यांतः किल देवताचैत्य इष्टकाभिश्चीयत इति । श्रियः सरस्वत्या वा भवनम् । तत्रासन्नचैत्यकाष्ठदेवतैव यंत्रप्रयोगादपिधानद्वारं तद्देवतायतनमिति जनैः प्रतीयते । न भूमिगृहद्वारमिति भावः । अनेकसुरंगासंचारमापद्यपसारार्थं वासगृहं कारयेदिति संबंधः ।
९ अनेकभूमिकं घंटामलसारककलशोपेतम् ।
१० भित्तिगर्भविरचितसोपानत्वात् । गूढेत्यादि ।
११ शुषिरस्तंभेत्यादि । शुषिरस्तम्भेषु रचितश्रू(सू)क्ष्मसोपानत्वात् प्रवेशोऽपसारश्च स्तंभमध्येनैव भवति । तद्वासार्थं कारयेत् ।

1 S राजप्रणिधिः एकोनविंशोध्यायः; J प्रथमेऽधिकरणे राज० एकोन०; G प्रथमाधिकरणे एकोनं राज° । 2 SJG °कक्ष्या । 3 SJ 'मध्ये' पतितः; svl G वा मध्ये वास° । 4 SJG वा वासगृहं । 5 SJG 'कारयेत्' नास्ति । 6 SJG °हं वासन्नकाष्ठचैत्य° । 7 SJ °विधान । 8 SJG 'वा तस्योपरि' नास्ति । 9 SJG सुषिर° ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पसारं [३५प्र.] वा वासगृहं यन्त्रबद्धतलावपातं[१] कारयेदापत्प्रतीकारार्थम् आपदि[1] कारयेत्। अतोऽन्यथा वा विकल्पयेत्[२]। सहाध्यायिभयात्।

मानुषेणाग्निना[३] त्रिरपसव्यं परिगतमन्तःपुरमग्निरन्यो न दहति। न चात्रान्योऽग्निर्ज्वलति[४]। वैद्युतेन[५] भस्मना मृत्संयुक्तेनावलं(लि)प्तं[2] च।

[3]जीवन्तीश्वेता[६][७]मुष्कक[८]पुष्पवन्दाकाभि[१०]रक्षीवे[4] जातस्याश्वत्थस्य प्रतानेन गुप्तं[5] सर्पा विषाणि वा न [३५द्वि.] प्रभवंति[6]।

[7]मयूरपृषतनकुलोत्सर्गः[११] सर्पान् भक्षयंति। शुकसारिके[9] भृङ्गराजो[१२] वा सर्पविषशङ्कायां क्रोशंति[10]। क्रौंचो विषाभ्यासे[11] माद्यति ग्लायति [12]जीवंजीवको म्रियते मत्तकोकिलः। चकोरस्याक्षिणी विरज्येते[13]। इत्येवमग्निविषसर्पेभ्यः प्रतिकुर्वीत।

पृष्ठतः[१३] कक्षाविभागे[14] स्त्रीनिवेशो[१४] गर्भव्याधि[१५]संस्था[15] वृक्षोदकस्थानं च। बहिः कन्या-कुमारपुरम्। पुरस्तादलङ्कारभूमिर्मन्त्रभूमिरुपस्थानं कुमाराध्यक्ष[१६]स्थानं च। कक्षांतरे[16]ष्व[१७]न्तर्वंशिक[१८]सैन्यं तिष्ठेत्।

१ तलं भूमिकातुलोपरि फलकास्तारादिलक्षणं तस्यावपातः शत्रोरुपरि पातः। स यन्त्रेणावबद्धो यस्य कार्यकाले कीलापनयनात्पततीति कारयेदिति। राज्ञो वासगृहे यथापत्प्रयत्नकरणं आपत्प्रतीकारार्थम्। आपदि वा भविष्यन्त्यां कारयेत्। पूर्वकृते तु मंत्रभेदः स्यादिति।

२ मतिविभवैर्विभवं कल्पयेत्। सहाध्यायिनामप्येतदेव शास्त्रं ततश्च सावधाना नातिसंधातुं शक्यंते।

३ मानुषाग्निः शस्त्रहतस्य शूलप्रोतस्य वा नरस्य वामपार्श्विकायां कल्माषवेणुनिर्मथनोत्पन्नो मानुषोऽग्निस्तेनोल्कारूपेण। त्रिरपसव्यं त्रीन् वारान् प्रदक्षिणेन परिगतं नीराजितमग्निरन्यो न दहति। स एव दहतीति भावः। वक्ष्यति च मानुषेणाग्निना परदुर्गमादीपयेयुरिति।

४ महानसदीपादावपि।

५ विद्युद्दग्धस्य वृक्षस्य भस्मना वल्मीकमृदायुक्तेन करकजलेनार्द्रितेन।

६ डोडी। ७ गिरिकर्णिका। ८ मुष्कके जातपुष्पोपलक्षितो वंदाकः।

९ शोभांजने। १०. वंदनमालाविरचितेन।

११ एतेषां निशांते उत्सर्गो मोक्षः सर्पान् भक्षयति एते उत्सृष्टाः सर्पान् भक्षयंतीत्युपचारः।

१२ कृष्णः शुकप्रमाणः पक्षी।

१३ मध्यमकक्षावस्थितवासगृहात् पृष्ठतः। १४ सुभगकुलस्त्रीगृहाणि।

१५ एकतो गर्भिण्यः अन्यतो व्याधिताः। १६ कुमाराणां अध्याक्षाणां च। १७ प्राकारमूलेषु।

१८ अंतर्वंशो राज्ञः पुत्रदारं तत्र नियुक्तोऽन्तर्वंशिकस्तस्य सैन्यम्।

1 SJG वा कारयेत्। 2 S कनकवारिणाऽवलिप्तं; JG °वारिणावलिप्तं। 3 S जीवान्ती। 4 S °क्षीपे; Svl °क्षीवे। 5 SJG -वा गुप्तं। 6 SJG प्रसहन्ते। 7 SJG मार्जारमयूरनकुलपृषतो। 8 Svl °र्गास्सर्पान् भक्षयन्ति ?। 9 S शुकश्शारिका; Svl J शुकशारिका; G शुकःशारिका। 10 SJG क्रोशति; Svl क्रोशन्ति। 11 SJG विषाभ्याशे। 12 J जीवजीवकः। 13 Svl °ज्येत। 14 SJG °क्ष्या। 15 SJ त्रैद्यप्रख्यातसंस्था, G वैद्यप्रत्याख्यात°। 16 SJG °क्ष्या°।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्तर्गृहगतः स्थ [३६ प्र.] विरस्त्रीपरिशुद्धां देवीं पश्येत्[1]।

श्रूयते हि[2] देवीगृहे निलीनो[3] भ्राता[१] भद्रसेनं जघान। मातुःशय्यां-तर्गतश्च[२] [4]जननीप्रोत्साहितः कनिष्ठपुत्रदत्तयौवराज्यं कारूषविषयाधिपं घज्राख्यं पुत्रो दुर्जयः <जघान इत्युत्तरत्रानुवर्तते[4]> लाजान्मधुना[5] विषेण [6]विपर्यस्य[3] देवी[३] काशिराजम्। विषदिग्धेन नूपुरेण वैरन्त्यम्[४]। मेखलामणिना [५]सौवीरम्। जालूथ[6][7]मादर्शेन। वेण्यां[8] गूढं शस्त्रं कृत्वा देवी [9]विदूरथं[७] जघान। तस्मादेतान्यास्पदानि परिहरेत्।

मुंडजटिलकुहक[८]प्रतिसंसर्गं बा[३६ द्वि.]ह्याभिश्च [९]दासीभिः प्रतिषेधयेत्[१०]। न चैनाः[10] कुल्याः[१२] पश्येयुः। [१३]अन्यत्र गर्भव्याधिसंस्थाभ्यः[11]। रूपाजीवाः स्नान-[१४]प्रघर्ष[12]शरीराः [13]प्रवर्तितवस्त्रालङ्काराः पश्येयुः[१५]। [14]अशीतिकाः पुरुषाः पञ्चाशत्का वा [15]स्त्रियो मातापितृ[१६]व्यञ्जनाः स्थविरवर्षधरा[16]भ्यागारिकाश्चावरोधानां शौचा-शौचं विद्युः स्थापयेयुश्च[१७] स्वामिहिते।

स्वभूमौ च वसेत्सर्वः परभूमौ न सञ्चरेत्[१८]।
न च बाह्येन संसर्गं कश्चिदाभ्यन्तरो व्रजेत्॥
सर्वं[१९] चावेक्षितं वस्तु[17] निबद्धागमनिर्गमम्।
निर्गच्छेदभिगच्छेद्वा[18] मुद्रासंक्रान्तभूमिकम्॥

॥ इति विनयाधिकारिके निशांतप्रणिधिः विंशोऽध्यायः[19] ॥

*

१ भद्रसेनस्य। २ आलोड्य। ३ अनिच्छन्ती बलादभिगच्छंतम्।
४ व......धिपं दण्डपारुष्यातिपीडिता। ५ परंतपं (?).........।
६ अयोध्याधिपं स्वभावद्वेषात् ऋतावपि अनभिगता कामेन पीडिता।
७ वृष्णिविषयपतिं द्रव्यापहाराद् विद्विष्टा।
८ वाक्‌दंडयोश्च पारुष्यमर्थापहरणाक्रमौ। अन्यासक्तिस्तथा द्वेषः स्त्रीभ्यो भर्तुर्भयास्पदम्॥
९ मायायोगविदः। ते हि वश्याद्युपदेशद्वारेणाति......।
१० ....कौशलशालिनीभिः। ११ देवीचित्ताऽविचलनार्थम्।
१२ देवीनां कुलभवाः स्त्रियो भ्रात्रादयः कुमंत्रनिषेधार्थम्। १३ तत्र न दोषः।
१४ स्नानोद्वर्तनं.........राजकीयवस्त्रालंकार.........। १५ उपतिष्ठेयुः।
१६ अंतश्चराणां कृतकमातापितरः राजप्रणिहिता...।
१७ सावित्र्यादिमहासतीनिदर्शनादिभिः।
१८ आस्तां वासः संचारोऽपि निषिध्यते। परिचयात् स्नेहस्ततः कुमंत्राः संभवंति।
१९ सर्वं च सारफल्गु कुप्यादि द्रव्यं अवेक्षितं अंतःपुरद्वारस्थैः†...................।
(†इयं टिप्पणी द्वित्रिपंक्तिपरिमिता विस्तृता ज्ञायते परं विनष्टाक्षराऽतोऽशक्यः पाठोद्धारोऽस्याः।)

1 SJG पुस्तकेषु पश्येदित्यनन्तरं 'न काश्चिदभिगच्छेत्' इत्यधिकं पठ्यते। 2 SJG 'श्रूयते हि' नास्ति। 3 SJG °लीनो हि भ्राता। 4 SJG पुस्तकेषु 'जननी'त्यारभ्य 'वर्तते' पर्यन्ताः शब्दा नोपलभ्यन्ते। तत्स्थाने 'पुत्रः कारूश'मिति पठ्यते। 5 SJG मधुनेति। 6 SJG 'वि' पतितः। 7 SJG जालूथ°। 8 S वेण्यागूढं। 9 JG विडूरथं। 10 SJG चैनाः। 11 J °सस्थाभ्याम्। 12 SJG शुद्ध-शरीराः। 13 SJG परिव°। 14 SJG आ°। 15 SJG स्त्रियो वा। 16 SJG °वरा°। 17 SJG द्रव्यं। 18 SG °धिग°। 19 J प्रथमेऽधिकरणे विंशोऽध्यायः।; G प्रथमाधिकरणे विंशो° निशान्तप्रणिधिः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[आत्मरक्षितकम् ।]

शयनादुत्थितः स्त्रीगणै[१]र्धन्विभिः[२] परिगृह्येत[३] । द्वितीयस्यां कक्षायां कञ्चुकोष्णीषिभि[४]र्वर्षधराभ्यागारिकैश्च[3] तृतीयस्यां कुब्जवामनकिरातैश्चतुर्थ्यां[4] मन्त्रिभिः संबन्धिभि[५]र्दौ[2] [३७ प्र.]वारिकैः प्रास[६]पाणिभिः । पितृपैतामहमहासम्बन्धानु[७]बद्धं शिक्षित[७]मनुरक्तं कृतकर्माणं[८] च[4] जनमासन्नं कुर्वीत ।

नान्यतोदेशीयमकृता[९]र्थमानम् । स्व[१०]देशीयं वा[5]पकृत्योपगृहीत[११]म् । अंतर्वं[१२]शिकसैन्यं राजानं अन्तःपुरं च रक्षेत् ।

[१३]गुप्ते [१४]देशे माहानसिकः सर्व[१५]मास्वादबाहुल्येन[१६] कर्म कारयेत् । तद्[१७]राजा तथैव प्रतिभुञ्जीत । पूर्वमग्नये वयोभ्यश्च बलिं कृत्वा प्रति[१८]भुञ्जीत[6] ।

---

१ पंचादिपरिकल्पितो जनसमूहो गणः । तथा चोक्तम्–

पंचावरं गणं विद्यादाशतादिति भार्गवः ।
यथासामर्थ्यमित्येवं बार्हस्पत्याः प्रचक्षते ॥

२ धनुर्वेदप्रवीणैः । राजशरीररक्षार्थम् । अन्येषां शस्त्रिणां अंतःपुरे अप्रवेशात् । धनुर्ग्रहणं च सर्वायुधाधिक्यप्रदर्शनार्थमुक्तम् ।

यान्यायुधानि शस्त्राणि स्थावराणि चराणि च ।
धनुषो गोचरे तानि न तेषां गोचरे धनुरिति ॥

३ प्रथमकक्षायामिति शेषः ।

४ कंचुका आप्रपदीनाः कूर्पासकाः । उष्णीषाः सर्वमुखव्यापीनि शिरोवेष्टनानि । तानि विद्यंते येषां वर्षधरादीनाम् ।

५ यौनादिः संबंधः ।

६ क्षेप्यायुधहस्तैः ।

७ * (विस्तृताऽत्र टिप्पणी दृश्यते । परं विनष्टाक्षरा इति नोद्धर्तुं शक्यते ।)

८ कृतं बहुशः समरेषु अद्भुतं कर्म येन तं जनं शस्त्रपाणिं आसन्नम् ।

९ तमपि कृतार्थमानं शिक्षितमनुरक्तं कृतकर्माणं आसन्नं कुर्वीत ।

१० पितृपैतामहादिकम् ।

११ आसन्नं च कुर्वीतेति संबंधः । उक्तं च–

अपराद्धानि मित्राणि भृत्यानपि विरोधितान् ।
..................आसान्न कुर्वीत विचक्षणः ॥

१२ पूर्वोक्तम् । १३ ....मभिधाय रसदेभ्योऽभिधातुमाह ।

१४ नियुक्तव्यतिरिक्तानां अदृश्ये ।

१५ शाकतंदुलादि ।

१६ परिचारकपेषकपाचकादिभिः क्रमेण आस्वादितैः ।

१७ ने(?)ति संबन्धः । १८ यदि न विषलिंगम् ।

---

1 SJG °क्ष्या° । 2 SJG °वरा° । 3 SJG 'च' पतितः । 4 SJG 'च' पतितः । 5 S वाऽप्यक्र°; JG वाप्यपक्र° । 6 SJG 'प्रतिभुञ्जीत' इति नास्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१]अग्नेर्ज्वालाधूम[1]नीलता शब्द[२]स्फोटनं च विषयुक्तस्य वयसां विपत्तिश्च । अन्नस्योष्मा मयूरग्रीवाभः शैत्यं आशु[3]क्लिष्टस्येव[२] वैवर्ण्यं सोदकत्वमक्लिन्नत्वं[3] च । व्यञ्जनानामाशुशुष्कत्वम् [4]क्वाथ[४]ध्याम[5]फेन[6]विच्छिन्नभावो गंधस्पर्शरसवधश्च । द्रवेषु[५] हीनातिरिक्तच्छाया[६]दर्शनं फेनपटलसीमंतोर्ध्व[७]राजीदर्शनं[८] च । रसस्य मध्ये नीला राजी पयसश्च[7] ता[३७ द्वि.]म्रा मद्यतोययोः काली दध्नः श्यामा[8] मधुनः श्वेता । द्रव्याणा[९]मार्द्राणा[१०]माशुम्ला[9]नत्वमुत्पक्वभावः । क्वाथनीलश्याम[10]ता च । शुष्काणामाशुशातनं वैवर्ण्यं[९] च । कठिना[११]नां मृदुत्वम् । मृदूनां[१२] च कठिनत्वम्[11] । तदभ्यासे[12] क्षुद्र[१३]जंतु[13]वधश्च । आस्तरण[१४]प्रावरणानां [14]ध्याम[१५]मंडलता । तंतु[१६]रोम[१७]पक्ष्म[१८]शातनं च । लोह[१९]मणि[२०]मयानां पंक[15]मलोपदेहता । [२१]स्नेहराग[२२]गौरवप्रभाव[२३]वर्ण[२४]स्पर्श[२५]वधश्चेति विषयुक्तस्य[16] लिङ्गानि ।

विषप्रदस्य तु शुष्कश्याम[17]वक्त्रता[२६] वाक्सङ्गः[२७] स्वेदो जृम्भणं[18] चातिमात्रं

१ तदेव दर्शयन्नाह ।

२ शब्दोपलक्षितं अन्नादेरिति शेषः । ३ हस्तमृदितस्येव ।

४ क्वाथभावोऽग्निव्यवधानेऽपि । ध्यामभावो द्रव्यान्तरास्पर्शेऽपि । फेनभावो विच्छिन्नभावश्च तद्धेत्वभावेऽपि ।

